
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

आ०उ०रा०

[illegible]

श्रीगणेशाय नमः ॥ श्रीसीतारामाभ्यां नमः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥ नमस्तस्मै
मुनीन्द्राय श्रीयुताय तपस्विने ॥ शांताय वीतरागाय वाल्मीकाय नमो नमः ॥ २ ॥ रामाय रामभद्राय रामचंद्राय वेधसे ॥ रघुनाथा
य नाथाय सीतायाः पतये नमः ॥ ३ ॥ जयति रघुवंशतिलकः कौशल्यानन्दवर्द्धनो रामः ॥ दशवदननिधनकारी दाशरथिः पुंडरी
काक्षः ॥ ४ ॥ तमसातीरनिलयं निनिःश्रेयं तमसा गुरुं ॥ वचसा प्रथमस्थानं वाल्मीकिं मुनिपुंगवम् ॥ ५ ॥ विनयावनतो भूत्वा भरद्वा
जो महामतिः ॥ अपृच्छत् तमतः शिष्यः कृतांजलिपुटो वशी ॥ ६ ॥ रामायणमिति ख्यातं शतकोटिप्रविस्तरम् ॥ श्रुणीतं भवता
पद्मब्रह्मलोके प्रतिष्ठितम् ॥ ७ ॥ श्रूयते ब्रह्मणा नित्यमृषिभिः पितृभिः सुरैः ॥ पंचविंशतिसाहस्रं रामायणमिदं सुवि ॥ ८ ॥
तद्वा कथितमस्माभिः सविशेषं महामुने ॥ शतकोटिप्रविस्तारे रामायणमहार्णवे ॥ ९ ॥ किं गीतमिह यन्नास्ति तन्मे कथय
सुव्रत ॥ आकर्ण्यादरितः पृष्टं भारद्वाजस्य वै मुनिः ॥ १० ॥ हत्वा मंत्रकवत्सर्वं तस्मात् शतकोटिकम् ॥ ओमित्युक्त्वा मुनिः
शिष्यं प्रोवाच वदतां वरः ॥ ११ ॥ भारद्वाज चिरंजीव साधु स्मारितमद्य नः ॥ शतकोटिप्रविस्तारे रामायणमहार्णवे ॥ १२ ॥ राम
स्य चरितं सर्वमाश्चर्यं सम्यगीरितम् ॥ पंचविंशतिसाहस्रं नृलोके यत्प्रतिष्ठितम् ॥ १३ ॥ रत्नोहि सदृशं रामचरितं वर्णितं त
तः ॥ सीतामाहात्म्यसारं यत् विशेषादत्र नोक्तवान् ॥ १४ ॥ श्रृणुष्वावहितो ब्रह्मन् काकुत्स्थचरितं महत् ॥ सीतायामद्भु

॥ १ ॥

तायाः प्रकृतेश्च रितं च यत् ॥१४॥ आश्चर्यमाश्चर्यमिदं गोपितं ब्रह्मरोगहे ॥ हिताय प्रियशिष्याय तुभ्यमावेदयामित
त् ॥१६॥ जानकी प्रकृतिः सृष्टेरादिभूता महागुणा ॥ तपः सिद्धिः स्वर्गसिद्धिः सिद्धिर्मूर्तिमतां सती ॥१७॥ विद्याऽविद्या च
महती गीयते ब्रह्मवादिभिः ॥ निधिः सिद्धिगुणमयी गुणातीता गुणात्मिका ॥१८॥ ब्रह्मोऽडरूपसंभूता सर्वकारणका
रणम् ॥ प्रकृतिर्विकृतिर्देवी चिन्मयी चिद्विलासिनी ॥१९॥ महाकुंडलिनी सर्वानुस्यूता ब्रह्मसंज्ञिता ॥ तस्यावे
लंबितं सर्वं जगदेतच्चराचरम् ॥२०॥ यां मायां यत्र हि ब्रह्मन्योगिनस्तत्वदर्शिनः ॥ विवदंति हृद्ग्रंथिं भवंति
च खमूर्तिकाः ॥२१॥ यदा यदा हि धर्मस्य ग्लानिर्भवति सुव्रत ॥ अभ्युत्थानमधर्मस्य तदा प्रकृतिसंभवः ॥२१
॥ रामः साक्षात्परब्रह्म परं धाम परः पुमान् ॥ आकृतौ परमो भेदो न सीतारामयोर्मर्थतः ॥२२॥ रामः सीता जानकी
रामभद्रो नाणुर्भेदो वैनयो रस्ति कश्चन ॥ संतो वुध्वा नत्वमेतद्विबुधाः पारं याताः संसृतेर्मृत्युवक्त्रात् ॥२३॥
रामो चिंत्यो नित्यचित्सर्वसाक्षी सर्वांतःस्थः सूर्यजो कैककर्ता ॥ भर्ता हर्ता नंदमूर्तिर्विभूमा सीतायोगाच्चिंत्यते
योगिभिः सः ॥२४॥ अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः सशृणोत्यकर्णः ॥ स वेत्ति विश्वं न हि

भेदयतीति शेषः ४

तस्य वै ज्ञातमाहात्म्यं पुरुषं पुराणम् ॥२४॥ तयोः परं प्रेम तदा हरिष्येपयोर्यथा कारणादेहधारिणोः ॥ अरूपिणोरूपविधार
णोः पुनर्नरणामहोनुग्रहरूककेवलम् ॥२६॥ पठन्द्विजो वागृषभत्वमीयात् क्षत्रान्वयो भूपपतित्वमीयात् ॥ वणि
ग्जनः पुण्यफलत्वमीयात् श्रृण्वन्हि शूद्रोपि महत्वमीयात् ॥२८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अद्भुतोत्तरकांडे
आदिकाव्ये प्रथमः सर्गः ॥१॥ भारद्वाज श्रृणुष्वाथ रामचंद्रस्य धीमतः ॥ जन्मतः कारणं विप्र इक्ष्वाकुकुलवारिधौ ॥
१॥ सीतायाश्च महादेव्याः पृथिव्यां जन्महेतुकम् ॥ नरानककथामादौ वक्ष्यामि मुनिपुंगव ॥२॥ श्रूयतां मुनिशार्दूल
अंबरीषकथास्वयम् ॥ उरुषोत्तममाहात्म्यं सर्वपापहरं परम् ॥३॥ त्रिशंकोर्दयिता भार्या सर्वलक्षणशोभिता ॥ अंब
रीषस्य जननी नित्यं शौचसमन्विता ॥४॥ योगनिद्रासमारूढं शेषपर्यंकशायिनम् ॥ नारायणं महात्मानं ब्रह्मांडकमलो
द्भवम् ॥५॥ तमसा कालरुद्राख्यं रजसा कनकांडजम् ॥ सत्वेन सर्वगं विष्णुं सर्वदेवनमस्कृतम् ॥६॥ अर्चयामास तं देवं
वाङ्मनःकायवृत्तिभिः ॥ माल्यदामादिकं सर्वं स्वयमेवमधीकरत् ॥७॥ गंधादिपेषणं चैव धूपद्रव्यादिकं तथा ॥ तत्स
र्वं कौतुका विशास्वयमेव चकार सा ॥ शुभा पद्मावती नित्यं वाचा नारायणेति वै ॥८॥ अनंतेति च सा नित्यं भाषमाणा पतिव्र

ना॥ दशवर्षसहस्राणि तत्परेणांतरात्मना॥९॥ अर्चयामास गोविंदं गंधपुष्पादिभिः शुभैः॥ विप्रमुख्यान्महाभागान्सर्वपापप्र
विवर्जितान्॥१०॥ दानमानार्चनैर्नित्यं धनै रत्नैरतोषयत्॥ ततः कदाचित्सा देवी द्वादशीं समुपोष्य वै॥११॥ हरेरग्रे महाभाग
सुष्वाप पतिना सह॥ तत्र नारायणो देवस्तामाह पुरुषोत्तमः॥१२॥ किमिच्छसि वरं भद्रे मत्तः किं ब्रूहि भामिनि॥ सा दृष्ट्वातं
वरं वव्रे पुत्रस्त्वं देय कृतिमान्भवेत्॥१३॥ सार्वभौमो महातेजाः स्वकर्मनिरतः शुचिः॥ तथेत्युक्त्वा ददौ तस्यै फलमेकं जना
र्दनः॥ सा प्रबुद्धा फलं दृष्ट्वा भर्त्रे सर्वं निवेद्य च॥१५॥ ऋतुस्नाता शुभमाचारं वासुदेवपरायणम्॥ शुभः तत्क्षणात्तं पत्नी चक्रां
कितमनुत्तमम्॥१७॥ भक्षयामास तं हृष्टा फलं तद्गतमानसा॥ ततः कालेन सा देवी पुत्रं कुलविवर्द्धनं॥१८॥ जातं दृष्ट्वा पि
ता पुत्रं क्रियाः सर्वाश्चकार वै॥ अंबरीष इति ख्यातो लोके समभवत्प्रभुः॥१९॥ पितर्युपरते धीमान्स्वाभिषिक्तो म
हात्मभिः॥ मंत्रिष्वाधाय राज्यं च तपश्चचार सः॥१९॥ संवत्सरसहस्रं वै जपन्नारायणं प्रभुम्॥ हृत्पुंडरीकमध्यस्थं
सूर्यमंडलमध्यतः॥२०॥ शंखचक्रगदापद्मं धारयंतं चतुर्भुजम्॥ शुद्धजांबूनदनिभं ब्रह्मविष्णुशिवात्मकम्॥२१॥ सर्वाभर
णसंयुक्तं पीतांबरधरं प्रभुम्॥ श्रीवत्सवक्षसं देवं पुरुषोत्तमम्॥२२॥ ततो गरुडमारुह्य सर्वदेवैरभिष्टुतः॥ आजगाम पुरुषं

जो॰

तविश्वात्मा सर्वलोकनमस्कृतः॥२३॥ ऐरावतमिवाचिंत्यं कृत्वा वै गरुडं हरिः॥ स्वयं शक्र इवासीनस्तमाह त्रपसत्तम॥
॥२४॥ इन्द्रोहमस्मि भद्रं ते किं ददामि तवाद्य वै॥ सर्वे लोकेश्वरो हित्वा रक्षितुं त्वमुपागतः॥२५॥ अंबरीषस्तु तं दृष्ट्वा शक्रो
मैरावते स्थितम्॥ उवाच वचनं धीमान् विष्णुभक्तिपरायणः॥२६॥ नाहं त्वामभिसंधाय तपश्चास्थितवानहम्॥ त्व
या दत्तं च नेच्छामि गच्छ शक्र यथासुखम्॥२७॥ मम नारायणो नाथस्त्वां नमस्तो षेमराधिप॥ गजेंद्र साकं परस्त्व त्वमम
चित्तं विलोपनम्॥२८॥ ततः प्रहस्य भगवान्स्वं ■रूपमकरोद्धरिः॥ शार्ङ्गचक्रगदापाणिः शंखहस्तो जनार्दनः॥२९॥
गरुडोपरि विश्वात्मा नीलाचल इवापरः॥ देवगंधर्वसंघैश्च स्तूयमानं समंततः॥३०॥ प्रणम्य राजा संतुष्टस्तुष्टाव ग
रुडध्वजम्॥ प्रसीद लोकनाथ त्वमनाथ त्वं मम नाथ जनार्दन॥३१॥ कृष्ण कृष्ण जगन्नाथ सर्वलोकनमस्कृत॥
त्वमादिस्त्वमनादिस्त्वमनंत पुरुषप्रभुः॥३२॥ अप्रमेयो विभुर्विष्णुर्गोविंदः कमलेक्षणः॥ महेश्वरांश्चै मध्यः पुष्करः
खगमः खगैः॥३३॥ कव्यवाहः कपाली त्वं हव्यवाहः प्रभंजनः॥ आदिदेव क्रियानंदः परमात्मनि संस्थितः॥३४॥ त्वां प्रपन्नोस्मि
गोविंद पाहि मां पुष्करेक्षण॥ नान्या गतिस्त्वदन्या मे त्वामेव शरणं गतः॥३५॥ तमाह भगवान्विष्णुः किं ते हृदि चिकीर्षि

सोमः॥ सूर्यः

जलेशः

नम्॥ तत्सर्वं ते प्रदास्यामि भक्तोसि मम सुव्रत॥३६॥ भक्तप्रियोस्मि नितरां तस्माद्द्रष्टुमिहागतः॥ अंबरीषस्तु तच्छ्रुत्वा हर्षगद्ग
दया गिरा॥३७॥ प्रोवाच परमात्मानं नारायणमनामयम्॥ त्वयि विष्णो परानंद नित्यं मे वर्ततां मतिः॥३८॥ भवेयं त्वत्परो नि
त्यं वा[illegible] मनःकायकर्मभिः॥ पालयिष्यामि पृथिवीं कृत्वा वै वैष्णवं जगत्॥३९॥ यज्ञहोमार्चनैश्चैव तर्पयिष्ये सुरोत्त
मान्॥ वैष्णवान्पालयिष्यामि हनिष्यामि च शात्रवान्॥४०॥ एवमुक्तस्तु भगवान्प्रत्युवाच नृपोत्तमम्॥ एवमस्तु तवेप्सि
तं चक्रमेतत्सुदर्शनम्॥४१॥ पुरा रुद्रप्रभावेन मल्लब्धं वै दुर्लभं मया॥ ऋषिशापादिकं दुःखं शत्रुरोगादिकं तथा॥४२॥ निह
निष्यति ते दुःखमित्युक्त्वांतरधीयत॥ ततः प्रणम्य मुदितो राजा नारायणं प्रभुम्॥४३॥ प्रविश्य नगरीं दिव्यामयोध्यां पर्यपा
लयत्॥ ब्राह्मणादींस्तथा वर्णान्स्वेस्वेकर्मण्ययोजयत्॥४४॥ नारायणपरो नित्यं विष्णुभक्तानकल्मषान्॥ पालयामास हृष्टात्मा
विशेषेण जनाधिपः॥४५॥ अश्वमेधशतैरिष्ट्वा वाजपेयशतानि च॥ पालयामास पृथिवीं सागरावरणामिमाम्॥४६॥ गृ
हे गृहे हरिस्तस्थौ वेदघोषो गृहे गृहे॥ नामघोषो हरेश्चैव यज्ञघोषस्तथैव च॥४७॥ अभवन्नृपशार्दूले तस्मिन्राज्ये प्रशासति
॥ नासस्या नानृता नृनिर्न दुर्भिक्षादिभिर्युता॥४८॥ रोगहीनाः प्रजा नित्यं सर्वोपद्रववर्जिताः॥ अंबरीषो महातेजाः पाल

6

यामास मेदिनीम् ॥ स वै महात्मा सततं च रक्षितः सुदर्शनेन प्रियदर्शनेन ॥४९॥ चतुःसमुद्रावधिसंनतां महीं सुपालयामा
स महीमहेंद्रः ॥५०॥ इत्यार्षे अद्भुतरामायणे द्वितीयः सर्गः ॥२॥ तस्यैवं वर्त्तमानस्य कन्या कमललोचना ॥ श्रीमती नाम वि
ख्याता सर्वलक्षणशोभिता ॥१॥ तस्मिन्काले मुनिः श्रीमान्नारदोभ्यागतो गृहम् ॥ अंबरीषस्य राज्ञो वै पर्वतश्च महाद्यु
तिः ॥२॥ तावुभावागतौ दृष्ट्वा प्रणिपत्य यथाविधि ॥ अंबरीषो महातेजाः पूजयामास तावृषी ॥३॥ कन्यां तां प्रेक्ष्य भ
गवान्नारदः प्राह विस्मितः ॥ केयं राजन्महाभागा कन्या सुरसुतोपमा ॥४॥ ब्रूहि धर्मभृतां श्रेष्ठ सर्वलक्षणशोभिता ॥ नि
शम्य वचनं तस्य राजा प्राह कृतांजलिः ॥५॥ दुहितेयं मम विभो श्रीमती नाम नामतः ॥ कदान समयं प्राप्ता वरमन्वेषती शु
भा ॥६॥ इत्युक्ते मुनिशार्दूलस्तामैच्छन्नारदो द्विजः ॥ पर्वतोपि मुनिस्तां वै चकमे नृपसत्तम ॥७॥ अनुज्ञाप्य तु राजानं
नारदो वाक्यमब्रवीत् ॥ रहस्याहूय धर्मात्मा मम देहि सुतामिमाम् ॥८॥ पर्वतोपि तथा प्राह राजानं रहसि प्रभुम् ॥ तावुभौ
प्राह धर्मात्मा प्रणिपत्य भयार्दितः ॥९॥ उभौ भवंतौ कन्या मे प्रार्थयानौ कथं त्वहम् ॥ करिष्यामि महाप्राज्ञ शृणु नारद मे वचः ॥१०॥

जानेति शेषः

त्वंच पर्वत मे वाक्यं शृणु वक्ष्यामि यत्प्रभो ॥ कन्ये यं पुवयोरेकं वरयिष्यति चेत्शुभा ॥११॥ तस्मै कन्यां प्रयच्छामि नान्यथा शक्तिरस्ति मे ॥
तथेत्युक्त्वा तु तौ विप्रौ श्वश्रापास्यावरवहि ॥१२॥ इत्युक्त्वा मुनिशार्दूलौ जग्मतुः प्रीतमानसौ ॥ वासुदेवपरौ नित्यं सुभौ ज्ञानवतां व
रौ ॥१३॥ विष्णुलोकं ततो गत्वा नारदो मुनिसत्तमः ॥ प्रणिपत्य हृषीकेशं वाक्यमेतदुवाच ह ॥१४॥ वृत्तांतं च निवेद्याग्रे नाथ नारा
यणार्थये ॥ रहसि त्वां प्रवक्ष्यामि नमस्ते भुवनेश्वर ॥१५॥ ततः प्रहस्य गोविंदः सर्वात्मा कमितं मुने ॥ ब्रूहि इत्याह विश्वात्मा मुनिराह च के
शवम् ॥१६॥ त्वदीयो नृपतिः श्रीमानंबरीषो महामतिः ॥ तस्य कन्या विशालाक्षी श्रीमती नाम नामतः ॥१७॥ परिणेतुमहं तां वै इच्छा
मि वचनं शृणु ॥ पर्वतोयं मुनिः श्रीमांस्तव भृत्यस्तपोनिधिः ॥१८॥ तामैच्छत्सोपि भगवंस्तावामाह जनाधिपः ॥ अंबरीषो
महातेजाः कन्येयं युवयोर्वरम् ॥१९॥ लावण्ययुक्तं वृणुयाद्यदि तस्मै ददाम्यहम् ॥ इत्याहावां नृपस्तत्र तथेत्युक्त्वा प्यहं गतः
॥२०॥ आगमिष्यामि ते राजन् श्वः प्रभाते गृहं प्रति ॥ आगतोहं जगन्नाथ कर्तुमर्हसि मे प्रियम् ॥२१॥ वानराननवद्भाति पर्व
तस्य मुखं यथा ॥ तथा कुरु जगन्नाथ मम चेदिच्छसि प्रियम् ॥२२॥ श्रीमती तु तथा पश्येन्नान्यः पश्येत्तथाविधम् ॥ तथेत्युक्त्वा ज
गोविंदः प्रहस्य मधुसूदनः ॥२३॥ त्वयोक्तं तत्करिष्यामि गच्छ सौम्य यथा सुखम् ॥ एवमुक्तो मुनिर्हृष्टः प्रणिपत्य जनार्दनम् ॥२४॥

मती ४

मन्यमानः कृतात्मानमयोध्यांवैजगाम सः ॥ गते मुनिवरे तस्मिन् पर्वतोपि महामुनिः ॥ २५ ॥ प्रणम्य माधवं हृष्टो रहस्येनमुवाच ह ॥ दृ
ष्टांतां निवेदयाग्रे नारदस्य जगत्पते ॥ २६ ॥ गोलांगूलमुखं यद्वत्सुखं भाति तथा कुरु ॥ श्रीमतीतु यथा पश्येन्नान्यः पश्येत्तथाविध
म् ॥ २७ ॥ तच्छ्रुत्वा भगवान् विष्णुस्त्वयोक्तं च करोमि वै ॥ गच्छ शीघ्रमयोध्यां त्वं मा वदीर्नारदस्य वै ॥ २८ ॥ त्वयामेसंविदंयद्वन्तथेत्यु
क्त्वा जगाम सः ॥ ततो राजा समाज्ञाय प्राप्तौ मुनिवरौ तदा ॥ २९ ॥ मंगलैर्विविधैर्भद्रैरयोध्यां ध्वजमालिनीम् ॥ मंडयामास राजेश्च पु
ष्पैश्चैव समंततः ॥ ३० ॥ अभिषिक्तगृहद्वारां सिक्तांगनमहापथाम् ॥ दिव्यगंधरसोपेतां धूपितां दिव्यधूपकैः ॥ ३१ ॥ कृत्वा च नग
रीं राजा मंडयामास तां शुभाम् ॥ दिव्यगंधैस्तथा माल्यैः सर्वाभरणभूषिताम् ॥ ३२ ॥ कृत्वा नृपेंद्रस्तां कन्यामादाय प्रविवेश ह ॥ स
र्वाभरणसंपन्ना श्रीरिवायतलोचना ॥ करसंमितमध्यांगी पंचस्निग्धा शुभानना ॥ स्त्रीभिः परिवृता दिव्या श्रीमती संस्थिता स
ती ॥ सभा तु सा भूमिपतेः समृद्धा मणिप्रवेकोत्तमरत्नचित्रा ॥ न्यस्तासना माल्यवती सुगंधा तामभ्ययुस्ते सुरराजवर्याः ॥ अथाययौ
ब्रह्मवरात्मजो महानसौ विधूतो भगवन्महात्मा ॥ स पर्वतो ब्रह्मविदां वरिष्ठो महामुनिर्नारदमाजगाम ॥ ३३ ॥ इत्यार्षेऽद्भुतोत्तरकां
डे नारदपर्वतप्रवेशो नाम तृतीयः सर्गः ॥ ३ ॥ तावागतौ समीक्ष्याथ राजा संभ्रांतमानसः ॥ दिव्यमासनमादिश्य पूजयामास तौ

वुभौ ।।१।। उभौ देवऋषी दिव्यौ नित्यं ज्ञानवतां वरौ ।। समासीनौ महात्मानौ कन्यार्थं मुनिसत्तमौ ।।२।। तावुभौ प्रणिपत्याग्रे कन्यां
तां श्रीमतीं शुभाम् ।। सुनीं कमलपत्राक्षीं महाराजो यशस्विनीम् ।।३।। अनयोर्यं वरं भद्रे मनसा त्वमिहेच्छसि ।। तस्मै मालामिमां
देहि प्रणिपत्य यथाविधि ।। एवमुक्ता तु सा कन्या स्त्रीभिः परिवृता तदा ।। मालां हिरण्मयीं शुभ्रामादाय शुभलोचना ।।५।।
तस्थौ तां महाराजो सौ वत्से किं त्वं करोषि वै ।। अनयोरेकमुद्दिश्य देहि मालामिमां शुभे ।।६।। सा माह पितरं त्रस्ता इमौ तु वानरा
ननौ ।। मुनिश्रेष्ठौ न पश्यामि नारदं पर्वतं तथा ।।७।। अनयोर्मध्यतस्त्वेकं वरं षोडशवार्षिकम् ।। सर्वाभरणसंयुक्तं मतसीपु
ष्पसंनिभम् ।।८।। दीर्घबाहुं विशालाक्षं तुंगोरस्थलमुत्तमम् ।। चामीकरवरपीतपट्टयुग्मकशोभितम् ।।९।। विभक्तत्रि
वलीयुक्तनाभिं व्यक्तकृशोदरम् ।। हिरण्याभरणोपेतं तुरंगकटकं शुभम् ।।१०।। पद्माकरकरं त्वेतं पद्मास्यं पद्मलोच
नम् ।। पद्मांघ्रिं पद्महृदयं पद्मनाभिं श्रियावृतम् ।।११।। दंतपंक्तिभिरत्यर्थं कुंदकु[illegible]ड्मलसंनिभैः ।। हसंतं मां सलोक्य
दक्षिणां च प्रसार्य वै ।।१२।। पाणिं स्थितमहं चात्र पश्यामि शुभमूर्द्धगम् ।। एवमुक्ते मुनिः प्राह नारदः संशयं गतः ।।१३।। कि
यंतो वाहवस्तस्य कन्ये ब्रूहि यथातथम् ।। बाहुद्वयं च पश्यामीत्याह कन्या सुविस्मिता ।।१४।। प्राह तौ पर्वतस्तत्र तस्य वक्षःस्थले

शुभे॥ किं च पश्यसि मे ब्रूहि करे किं धारयस्यपि॥१५॥ कन्या तमाह मा॰नं वै पंचरूपामनुत्तमाम्॥ वक्षस्य॰स्य पश्यामि करे
कार्मुकशायकौ॥१६॥ एवमुक्तौ मुनिश्रेष्ठौ परस्परमनुत्तमौ॥ मनसा चिंतयंतौ तौ मायेयं कस्य चिद्भवेत्॥१७॥ मायावी
तस्करो नूनं स्वयमेव जनार्दनः॥ समागतो न्यथा कुर्यात्कथमस्मन्मुखं त्विदम्॥१८॥ गो॰नां गृह्णीयमित्येवं चिंतयामास
नारदः॥ पर्वतोपि तथैवैवं वानरत्वं कथं मया॥१९॥ प्राप्तमित्येव सहसा चिंतामापेदिवांस्तथा॥ ततो राजा प्रणम्यासौ नारदं
पर्वतं तथा॥२०॥ भवद्भ्यां किमिदं भद्रौ कृतं बुद्धिविमोहनम्॥ स्वास्थ्यौ भवंतौ तिष्ठतां यदि कन्यार्थमुद्यतौ॥२१॥ एवमुक्तौ
मुनिश्रेष्ठौ नृपमूचतुरुल्बणौ॥ त्वमेव मोहं कुरुषे नावामिह कथंचन॥२२॥ आवयोरेकमेवात्र वरयत्वेव सा विति॥ ततः
सा कन्यका भूपः प्रणिपत्य च देवताम्॥ पित्रा नियुक्ता सहसा मुनिशापभयाद्द्विजः॥ मा॰नामादाय तिष्ठंतीं तयोर्मध्ये
समाहिता॥२४॥ पूर्ववत्पुरुषं दृष्ट्वा मा॰नां तस्मै ददौ हि सा॥ अनंतरं हि सा कन्या ह्यदृष्टा मनुजैः पुरः॥२५॥ ततो नादः
समभवत्किमेतदिति विस्मयात्॥ तामादाय गतो विष्णुः स्वस्थानं पुरुषोत्तमः॥२६॥ पुरा तदर्थमनिशं तपस्तप्त्वा वरांग

उत्तमात्मानमिति शेषः ३

ना॥श्रीमतीयंसमुत्पन्नामागताचतथाहरिं॥२७॥तावुभौमुनिशार्दूलौधिक्कृत्वामित्येवदुःखितौ॥वासुदेवंप्रतितदाजग्म
तुर्भवनंहरेः॥२८॥तावागतौसमीक्ष्याह श्रीमतींगुणवान्हरिः॥मुनिश्रेष्ठौसमायातौगृहस्वात्मानमत्रवै॥२९॥तथेत्यु
क्त्वावसादेवीप्रहसंतीचकार ह॥नारदःप्रणिपत्याग्रेप्राहदामोदरंहरिम्॥३०॥किमिदंकृतवानद्यममत्वंपर्वतस्यच॥त्व
मेवनूनंगोविंदकन्यांतांहृतवानसि॥३१॥तच्छ्रुत्वापुरुषोविष्णुःपिधायश्रोत्रमच्युतः॥पाणिभ्यांप्राहभगवान्
भवताकिमुदीरितम्॥३२॥कामवादोनभावेयोमुनिवृत्तिरहोकिल॥एवमुक्तोमुनिःप्राहवासुदेवंसनारदः॥३३॥कर्ण
मूलेममकथंगोलांगूलमुखंत्विति॥तदाकर्ण्यमहाबुद्धिर्देवोनारायणोहरिः॥३४॥कर्णमूलेतथादेहंवानरास्यंकृतं
मया॥पर्वतस्यमयाविप्रगोलांगूलमुखंतव॥३५॥यथाभवांस्तथासोऽपिप्रार्थयामासनिर्जने॥मामेवभक्तिवशतस्तथा
स्यंकरवंमुने॥३६॥नखेच्छयाकृतंतेत्वांप्रियार्थंनान्यथात्विति॥याचनेयच्चयश्चैवतच्चतस्यददाम्यहम्॥३७॥नप
दोषोत्रगुणोवापियुवयोर्ममवाद्विज॥पर्वतोपितथाप्राहतस्याप्येवंजगादसः॥३८॥शृण्वतोरुभयोस्तत्रप्राहदामोदरंव
चः॥प्रियंभवतोःकृतवान्सत्येनायुधमालभे॥३९॥नारदःप्राहधर्मात्माआवयोर्मध्यतःस्थितः॥धनुष्मान्द्विभुजः
कोनुतांहृत्वागतवान्किल॥४०॥तच्छ्रुत्वावासुदेवोसौप्राहतौमुनिसत्तमौ॥मायाविनोमहात्मानोबहवःसंतिसत्तमौ॥४१

नत्रसा श्रीमती नूनं हता केनापि सांप्रतम्॥ चक्रपाणिरहं नित्यं चतुर्भुज इति स्थितिः॥४२॥ तस्मान्नाहमिति तथ्यं भव
द्भिर्विदितं हि तत्॥ इत्युक्ते प्रणिपत्यैनमूचतुः प्रीतमानसौ॥४३॥ न कोऽत्र दोषस्तव विभो नारायण जगत्पते॥ दोषात्म्यं तु
न्नृपस्यैव मायां हि कृतवानसौ॥४४॥ इत्युक्त्वा जग्मतुस्तस्मान्मुनी नारदपर्वतौ॥ अंबरीषं समासाद्य शापेनैनमयोजय
त्॥ नारदः पर्वतश्चैव यस्माद्वामभिगतौ॥ आहूय पश्चादन्यस्मै कन्यां त्वं दत्तवानसि॥४६॥ मायायोगेन तस्मा
त्त्वं तमोऽस्माभिर्भविष्यति॥ तेन चात्मानमत्यर्थं यथावन्न हि वेत्स्यसि॥४७॥ एवं शापे प्रदत्ते तु तमोराशिरथोत्थितः॥
नृपं प्रति ततश्चक्रं विष्णोः प्रादुरभूत्क्षणात्॥४८॥ चक्रवित्रासितं घोरं तावुभावभ्यगात्तमः॥ ततः संत्रस्तसर्वां
गौ धावमानौ महामुनी॥४९॥ पृष्ठतश्चक्रमालोक्य तमोराशिं च दुर्मदम्॥ कन्यासिद्धिरहो प्राप्ता आवयो
रिति वेगितौ॥५०॥ लोकाल्लोकांतमनिशं धावमानौ भयार्दितौ॥ त्राहि त्राहीति गोविंद भाषमाणौ भयार्दि
तौ॥५१॥ विष्णुलोकं ततो गत्वा नारायण जगत्पते॥ वासुदेव हृषीकेश पद्मनाभ जनार्दन॥५२॥ त्राह्यावां पुंडरीकाक्ष
नाथोऽसि पुरुषोत्तम॥ ततो नारायणोऽचिंत्यः श्रीमान् श्रीवत्सलांछनः॥५३॥ निवार्य चक्रं ध्वांतं च भक्तानुग्रह

नवमः ५

काम्यया ॥ अंबरीषश्च मे भक्तस्तथैमौ मुनिसत्तमौ ॥ ५४ ॥ अनयोर्हि हितं कार्यं न १ स्यचमयाधुनः ॥ श्रापं तौ तेनतः श्री
मान् शीघ्रं प्रल्हादयन् हरिः ॥ ५५ ॥ उवाच भगवान् विष्णुः श्रूयतामिति मे वचः ॥ क्षमेथां मुनिशार्दूलौ भक्तसंरक्ष
णाय मे ॥ ५६ ॥ अपराद्धं च चक्रेण क्षमाशीला हि साधवः ॥ ततस्तौ मुनिशार्दूलौ मायां तस्या वबुध्यच ॥ ५७ ॥ ददतु
स्तु ततः शापं विष्णुमुद्दिश्य कोपनौ ॥ श्रीमतीहरणं विष्णो पत्नीत्वं क्षमनात्वया ॥ ५८ ॥ यथाप्नुर्यां तथैव त्वं जाते यो
५९
मधुसूदन ॥ अंबरीषस्यान्ववाये राज्ञो दशरथस्य हि ॥ पुत्रत्वं भवता पुत्री श्रीमती धरणीप्रजा ॥ भविष्यति विदेह
श्वमाप्य तां पाणिग्रहिष्यति ॥ ६० ॥ राक्षसापसदः कश्चित्तां ते भार्यां हरिष्यति ॥ यतो राज्ञोलधर्मेण हृता हि श्रीमती
शुभा ॥ ६१ ॥ अतस्ते राक्षसा भार्या हर्तव्या छद्मना च्युत ॥ यथा प्राप्तं महद्दुःखमावाभ्यां श्रीमतीकृते ॥ ६२ ॥ हे
तिवदताभ्यां वै नतथा दुःखं च तत्कृते ॥ इत्युक्तवंतौ तौ विप्रौ प्रोवाच मधुसूदनः ॥ ६३ ॥ अंबरीषस्यान्ववाये तु भविष्य

मता३

ति यशाः ॥ श्रीमान् दशरथो नाम भूमिपालो तिधार्मिकः ॥ ६४ ॥ तदा तस्यात्मजः पुत्रो रामो नाम भवाम्यहम् ॥ आत
त्मे दक्षिणो बाहुर्भरतो भविता किल ॥ ६५ ॥ शत्रुघ्नो वामबाहुश्च शेषो सौ लक्ष्मणः स्वयम् ॥ अबिपूर्णोपि न चैवा
तीदन्यथा चक्रगम्यताम् ॥ ६६ ॥ अविशापात्तमोराशे यदा रामो भवाम्यहम् ॥ तत्र मांसमुपागछ गछेदानीं रिपुं विना

अ.रा.॥८॥

विना॥६७॥ तावत्स्तमनुनिश्रेष्ठावितिस्म प्राह माधवः॥ एवमुक्तोत्तमो राशिः तत्क्षणाच्च जगाम वै॥६८॥ आत्मा
र्थं संचिंतितं तेन प्रभुना भक्तरक्षिणा॥ निवारितं हरेश्चक्रं यथापूर्वमतिष्ठत॥ मुनिश्रेष्ठो भयान्मुक्तो प्रणिपत्य जना
र्दनम्॥ निर्गतौ शोकसंतप्तौ ऊचतुस्तौ परस्परम्॥७०॥ अद्यप्रभृति देहांतमावां कन्यापरिग्रहम्॥ न करिष्याव इत्युक्त्वा
प्रतिज्ञाय च तावृषी॥७१॥ मौनध्यानपरौ शुद्धौ यथापूर्वं व्यवस्थितौ॥ अंबरीषो विराजामास परिपाल्य स्वमेदिनीम्॥७२॥ स
भृत्यज्ञातिसंबंधो विमुक्तो लोकं जगाम वै॥ मानार्थमंबरीषस्य तथैव मुनिसिंहयोः॥७३॥ रामो दाशरथिर्भूत्वा नमसातु प्रभु
र्द्विकः॥ कदाचित्कार्यवशातः स्मृतिः स्यादात्मनः प्रभुः॥७४॥ पूर्णार्थोपि महाबाहुरपूर्णार्थ इव प्रभुः॥ अनुग्रहाय भक्तानां
प्रभूणामीदृशी गतिः॥७५॥ मायां कृत्वा महेशो विप्रोस्थिनामानुषीं तनुः॥ तस्मान्माया न कर्तव्या विद्वद्भिर्दोषदर्शिभिः॥
७६॥ एतन्मे कथितं सर्वं रामजन्मकथाश्रयम्॥ अंबरीषस्य माहात्म्यं मायाविस्तरं च वै हरेः॥७७॥ यः पठेच्छृणुयाद्वापि मायावि
त्वं हरेर्विभोः॥ मायां विसृज्य शुद्धात्मा विमुक्तो लोकं स गच्छति॥७८॥ दशरथसुतजन्मकारणं यः पठति शृणोत्यनुमोदते द्वि
जेन्द्र॥ व्रजति स भवदुःखातिथित्वं न भयं हि भवे रघुनाथदत्त॥७९॥ इत्यार्षे रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकां

॥८॥

डे श्रीरामजन्मोपक्रमश्चतुर्थः सर्गः ॥४॥ वाल्मीकिरुवाच ॥ भारद्वाज शृणुष्वाद्य गीता जन्मनिकारणम् ॥ पुरा त्रेतायुगे क-
श्चित्कौशिको नाम वै द्विजः ॥१॥ वासुदेवपरो नित्यं नामगानरतः सदा ॥ भोजनासनशय्यासु स्मरन्नृत्यमानसः ॥२॥ उदाररवि-
तं विस्मोर्गायमानः पुनः पुनः ॥ विष्णुस्थलं समासाद्य हरेः क्षेत्रमनुत्तमम् ॥३॥ अगायत हरिं तत्र तालवर्णलयान्वितम् ॥ मू-
र्छनामूर्छयोगेन श्रुतिमंडलवेदितम् ॥४॥ भक्तियोगसमापन्नो भिक्षामश्नाति तत्र वै ॥ तत्रैनं गायमानं वै दृष्ट्वा कश्चि-
त् द्विजस्तदा ॥५॥ पद्माक्ष इति विख्यातस्तस्मै चान्नं ददौ सदा ॥ सकुटुंबो महातेजा अश्नन्नन्नं हितस्य वै ॥६॥ कौशिको-
हि तदा हृष्टो गायन्नास्ते हरिं प्रभुम् ॥ शृण्वन्नास्ते स पद्माक्षः कालेकाले च भक्तितः ॥७॥ कालयोगेन संप्राप्ताः शिष्या
वै कौशिकस्य च ॥ सत्यं राजन्यवैश्यानां विप्राणां कुलसंभवाः ॥८॥ ज्ञानविद्याधिकाः शुद्धा वासुदेवपरायणाः ॥ तेषा-
मपि तथान्नाद्यं पद्माक्षः प्रददौ स्वयम् ॥९॥ शिष्यैश्च सहितो नित्यं कौशिको हृष्टमानसः ॥ विष्णुःस्थले हरिं तत्र प्रास्ते गाय-
न्यथाविधि ॥१०॥ तत्रैव मालवो नाम वैश्यो विष्णुपरायणः ॥ दीपमालां हरेर्नित्यं करोति प्रीतमानसः ॥११॥ मालती नाम भा-
र्यास्ति तस्य नित्यं पतिव्रता ॥ गोमयेन समालिप्य हरेः क्षेत्रं समंततः ॥१२॥ भर्त्रा सहास्ते सुप्रीता शृण्वती गानमुत्तमम् ॥ कुश-

ग.रा.।।८।।

स्थ्यं तं समापन्ना ब्राह्मणाः शंसितव्रताः ।।१३।। पंचाशद्दे तु समापन्ना हरेर्गानार्थमुत्तमम् ।। साधयंतो हि कार्पासिकौशिक
स्य महात्मनः ।।१४।। गानविद्यार्थतत्वज्ञाः श्रावंतो प्ययसंततं ।। ख्यातमासीत्तदा तस्य गानं वै कौशिकस्य च ।।१५।। श्रुत्वा रा
जा समभ्येत्य कालिंगो वाक्यमब्रवीत् ।। कौशिकाद्य गणेः सार्द्धं गायस्वेह च मां पुनः ।। शृणुध्वं च यथा पूर्वं कुशस्थल्यं जनाश्च
वि ।। तच्छ्रुत्वा कौशिकः प्राह राजानं सांत्वयन् गिरा ।।१७।। न जिह्वा मे महाराज वाणी च मम सर्वदा ।। हरेरन्यमपींद्रं वा स्तोतुमि
च्छति न वक्ति च ।।१८।। एवमुक्ते तु तच्छिष्यो वसिष्ठो गौतमो ऽसितः ।। सारस्वतस्तथा वैश्यश्चित्रमाल्यस्तथा शिशुः ।।१९।। ऊ
चुस्तं पार्थिवं तत्र यथा प्राह स कौशिकः ।। श्रीकराश्च तथा प्रोचुः पार्थिवं विस्मृतत्वराः ।।२०।। श्रोत्राणीमानि श्रावंति ह
रेरन्यं न पार्थिव ।। गानं कीर्तिमयं यस्मात् शृणुयान्येन वा स्तुतिम् ।।२१।। तच्छ्रुत्वा पार्थिवो हृष्टो गीयतामिति चाब्रवीत् ।।
स्वभृत्यान् ब्राह्मणाश्चैते कीर्तिं श्रावं तु वै यथा ।।२२।। न श्रावंति कथां तस्मात् क्रीयमानां समंततः ।। एवमुक्ता च तद्दासा ज
गुः पार्थिवसत्तम ।।२३।। निरुद्धकर्णा विप्रास्ते गाने [illegible] नेट ते सुदुःखिताः ।। काममंशंकुभिरन्योन्यं श्रोत्राणि विभिदुर्द्धि
जाः ।।२४।। कौशिकाद्यास्तु तेज्ञात्वा मनो रतिं नरपस्य वै ।। प्रसह्य कस्मात्कारयति स्वगाने सो नृपः स्थिरम् ।।२५।। इत्यु

त्वा चाश्रु नियता जिह्वाग्रं चिच्छिदुः स्वकम्॥ ततो राजा सुसंक्रुद्धो स्वदेशात्तान् व्यवासयत्॥२६॥ आदाय वित्तं सर्वेषां ततस्ते जग्मु
रुत्तराम्॥ दिशमासाद्य ते सर्वे कालधर्मेण योजिताः॥२७॥ नानागतान्यमोहस्था किं कर्तव्यमिति स्म ह॥ विस्मितस्तत्क्षणे विप्र ब्रह्मा गा
महसुराधिपान्॥२८॥ कौशिकादीन् द्विजान्सर्वान् वासुदेवपरायणान्॥ गानयोगेन यो नित्यं पूजयंति जनार्दनम्॥२९॥
नानानयंमद्रं वौपदि देवत्वमिच्छत॥ इत्युक्ता लोकपालास्ते कौशिकेति पुनः पुनः॥३०॥ मालतीति तथा केचित् पद्माक्षेति तथा
परे॥ क्रोशमानाः समभ्येत्य नानादाय विलासा॥३०॥ ब्रह्मलोकं गताः शीघ्रं मुहूर्तार्द्धेन वै सुराः॥ कौशिकादीन् ततो दृष्ट्वा ब्रह्म
लोके पितामहः॥३१॥ प्रत्युद्गम्य यथान्यायं स्वागतेनाप्यपूजयत्॥ ततः कोलाहलमभूत् त्वक्षिगोचरमुच्चरणम्॥३२॥ ब्रह्मणा
श्च कृतं दृष्ट्वा देवानां द्विजसत्तम॥ हिरण्यगर्भो भगवांस्तान्निवार्य सुरोत्तमान्॥३३॥ कौशिकादींस्तदादाय मुनिदेवैः समावृतः॥ वि
ष्णुलोकं ययौ शीघ्रं वासुदेवपरायणाः॥३४॥ तत्र नारायणो देवः श्वेतद्वीपनिवासिभिः॥ ध्यानयोगेश्वरैः सिद्धैर्विष्णुभक्तिसमाहितैः॥
३५॥ नारायणसमैर्दिव्यैश्चतुर्बाहुधरैः शुभैः॥ विष्णुभक्तिसमापन्नैर्दीप्यमानैरकल्मषैः॥३६॥ नृत्यैर्नानाविधैश्चैव दिव्यस्त्रीभिः
समंततः॥ सेव्यमानोथ मध्ये वै सहस्रद्वारसंवृते॥३७॥ सहस्रयोजनायामे दिव्ये मणिमये शुभे॥ विमाने विमले चित्रे भद्रपी
ठासने हरिः॥३८॥ लोककार्यप्रसक्तानां कृत्वा दृष्टिं माधवः॥ तस्मिन्काले थ भगवान् कौशिकाद्यैश्च संवृतः॥३९॥ आगम्य प्र

लीयलीयन्याग्रेतुष्टाव गरुडध्वजम्॥ ततो विलोक्य भगवान् हरिर्नारायणः प्रभुः॥४०॥ कौशिकेत्याह संप्रीत्या मान्स

र्वांश्च यथाक्रमम्॥ तत्र चैवो वो महानासीन्महाश्चर्यसमागमे॥४१॥ ब्रह्माणमाह विश्वात्मा शृणु ब्रह्मन्मयोदितम्॥ कौशि

कस्य च ये विप्रा मासाध्यसाधनतत्पराः॥४३॥ हितायसंप्रवृत्ता वैकुशस्थलनिवासिनः॥ मत्कीर्तिश्रवणे युक्ता गानतत्वार्थकोवि

दाः॥४४॥ अनन्यदेवता भक्ता मामध्यादेवाभवंस्त्विमे॥ मत्समीपे तथान्यस्य प्रवेशं देहि सर्वदा॥४५॥ एवमुक्त्वा पुनर्देवः कौशिकं

प्राह माधवः॥ त्वच्छिष्यैस्त्वं महाप्राज्ञ दिव्यं धोमामकैंसदा॥४६॥ गणाधिपत्वमापन्नोपत्राहं त्वं समास्व वै॥ मान्ववंमान्ततीं वे

तिप्राहन्त्रा त्रिहरोहरिः॥४७॥ मम लोके यथाकामं भार्यया सह मानवः॥ दिव्यरूपधरः श्रीमान् शाश्वतं कालमिहानुगैः॥४८॥ व

से नित्यं यथाकामं यावल्लोका भवंति वै॥ पद्माक्षमाह भगवान् धनदो भव मानद॥४९॥ धनानामीश्वरो भूत्वा विहरस्व य

था सुखम्॥ गणाश्चोष्यंतिस्वामाशु प्राप्नोसि ममलोकताम्॥५०॥ एते च विप्रा नियतं मम भक्ता यशस्विनः॥ श्रोत्रच्छिद्रं सं

तं पूर्णं शंकुभिर्वै परस्परम्॥५१॥ श्रोष्यामो नैव चान्यद्वै हरेः कीर्तिमिनेतिये॥ महाव्रतधरा विप्रा मम भक्तिपरायणाः॥

५२॥ एते प्राप्नाश्च देवत्वं मम सान्निध्यमेव च॥ मालवो भार्यया सार्द्धं मल्लोके त्वं परिग्रहेव वै॥५३॥ गानमानादिभिर्नित्यं मम अर्च्यसततं हि

हिमाम्॥ गानं शृणोति यो नित्यं मत्कीर्तिचरितान्वितम्॥५४॥ तेनासौ प्राप्नुवाल्लोकं मम ब्रह्मसनातनम्॥ पद्माक्षो सौम

णभागकौशिकस्य महात्मनः ॥५५॥ धनेशात्वमवाप्नोषि मम संनिध्यमेव च ॥ एवमुक्त्वा हरिस्तत्र समास्ते लोकपूजितः ॥५६॥ न
तो हरिर्भक्तजनैः समावृतः सुखेन तस्थौ कनकासने शुभे ॥ मनोज्ञैकगम्यो जितभक्तिसर्वान्संलालयन्पाणिसरोरुहेण ॥५
७॥ इत्यार्षे रामायणे वाल्मीकीये अद्भुतोत्तरकांडे कौशिकादिवैकुंठगमनं नाम पंचमः सर्गः ॥५॥ तस्मिन्क्षणे समारब्धो मधुरा
क्षरपेशलैः ॥ महामहोत्सवस्तत्र कौशिकप्रीतियोजितैः ॥१॥ विपंचीगुणतत्त्वज्ञैर्वाद्यविद्याविशारदैः ॥ ततस्तत्र वराणां
वैचेरिकोरिसमावृता ॥२॥ गायमाना समायाता लक्ष्मीर्विष्णुपरिग्रहा ॥ रतासहस्रकोटीभिर्वैत्रपाणिभिराश्रुवे ॥
३॥ ब्रह्मादिसुरसंघानां तत्र दृष्ट्वा समागमम् ॥ चेटीगणाधिपारूढा भुशुंडीपरिवारान्विता ॥४॥ ब्रह्मादीस्तर्जयंतस्सौ मुनी
श्चापि समंततः ॥ उत्सार्य दूरं हृष्टा वेत्रिणः पर्वतोपमाः ॥५॥ सर्वे ब्रह्मर्षिभिर्यान्ताः सार्द्धं वै ब्रह्मणा सुराः ॥ युक्तमित्येव भा
षंतश्च मोरग्रेवयंतुके ॥६॥ स्थिताः प्रांजलयः सर्वे त्रिदशा गतमन्यवः ॥ तस्मिन्क्षणे समाहूतस्तुंबुरुर्मानपूर्वकम् ॥७॥
प्रविवेश समीपं वै देव्या देवस्य चैव हि ॥ तत्राक्षीणो यथा योगं नानामूर्च्छास्वरान्वितम् ॥८॥ जगौ कलपदं हृष्टो विपंचीं वा

ती

प्यवादयत् ॥ विष्णुना कौशिकप्रीतो प्रयुक्तो गायकोत्तमः ॥९॥ नानारत्नसमायुक्तो दिव्यैराभरणोत्तमैः ॥ दिव्यमाल्यैश्च
वसनैः पूजितो विष्णुमंदिरे ॥१०॥ निर्गतस्तुंबुरुर्हृष्टो जगाम स यथागमम् ॥ ब्रह्माद्यास्त्रिदशाः सर्वे मुनयश्च यथागतम् ॥

न॰प्र॰रा॰॥११॥

लक्ष्मी

॥११॥ जग्मुर्विष्णुप्रणाम्योच्चैर्जयेतिभाषिणस्ततः॥ नारदोथमुनिर्दृष्ट्वा तं तुरोः सत्क्रियां हरेः॥१२॥ शोकेनाविष्टमनसा
संतप्तहृदयेक्षणाः॥ चिंतामापेदिवांस्तत्र शोकसर्षीकुंचितनरः॥१३॥ ततः क्रोधेन महता ज्वालन्मुनिपुंगवः॥ लक्ष्मी
शशाप सहसा तद्दासीभिर्निराकृतः॥१४॥ यदहं राक्षसंभावं गृहीत्वा विष्णुकांतया॥ चेटीभिर्द्रावितैर्दूरं वेत्रपातेन ताडि
तः॥१५॥ तस्मात्सा जायतां राक्षसीगर्भसंभवा॥ यतोहं द्वारतः क्षिप्तश्चेटीभिः सावहेलनम्॥१६॥ हेलया राक्षसी चत्वां वहिः क्षि
प्स्यति भूतले॥ इत्युक्ते नारदेनाथ चकंपे भुवनत्रयम्॥१७॥ हाहाकारं ततश्चक्रुर्देवगंधर्वदानवाः॥ नारदो विलंप्याथ धि
ग्मां धिग्मामिति इति ब्रुवन्॥१८॥ नारायणसमायोगं महालक्ष्मीसमीपतः॥ अहो तुं दुर्गा प्राप्तं धिग्मां मूढमबोधनम्॥१९
योऽहं हरेः सन्निकर्षाद्दूत्यैर्निर्यासितः कथम्॥ जीवन्यास्यामि कुत्राहं किमेतं दुरूणा कृतम्॥२०॥ रोदमानो मुहुर्विद्वान्धि
ग्मामिति च चिंतयन्॥ ततो नारायणो लक्ष्म्याः शापं श्रुत्वा सुदारुणम्॥२१॥ लक्ष्म्या सह हृषीकेशः आजगाम यतो मुनिः॥
रमाप्रसाद्य तं विप्रं प्रत्युवाच कृतांजलिः॥२२॥ दुरुक्तं भवता मत्येतं तद्दानतदन्यथा॥ तत्र किंचित् प्रार्थयामि मुने तत्कृपया कुरु॥
२३॥ आरण्यानां मुनीनां वै सोकं सोकं च शोणितम्॥ कल्पशापूरितं भक्षेद्राक्षसी याचकामतः॥२४॥ तस्या गर्भे भविष्यामि

नच्छ्रोसि न समुद्रया ॥ इत्युक्तं रमया खिंत्या संभवेन्नो भवेदिति ॥ २५ ॥ नारदस्तु तथेत्याह अस्याः सर्वी हिदारुता ॥ ततो नारायणो
देवो प्रोक्तवान्नारदं मुनिं ॥ २६ ॥ नाहं दानेन तपसा नेज्यया नापि तीर्थतः ॥ संतुष्यामि द्विजश्रेष्ठ यथा नाम्नां प्रकीर्तनात् ॥ २
गानेन नामस्मरणात् समसायुज्यमाप्नुयात् ॥ निदर्शनं कौशिकोत्र गीनात् सश्लोकमाप्नुयात् ॥ २८ ॥ मूर्छनादियुतं गानं नाम्ना मति
मम प्रियम् ॥ तुंबुरुस्तत्प्रभावेन प्रियस्त्वितोपि मे द्विज ॥ २९ ॥ मूर्छनात्पयोगेन गानेन त्वं तथा भव ॥ उक्तं पश्य गत्वा त्वं यदिग
नेमनिस्तव ॥ ३० ॥ मानसोत्तरशैले तु गानबंधुरिति स्मृतः ॥ तद्दृक्षशीघ्र शैलेंद्रं गान्त्वा स्त्वं भविष्यसि ॥ ३१ ॥ इत्युक्तो वि
ष्णयाविष्टो नारदो वाग्विदांवरः ॥ मानसोत्तरशैले तु गानबंधुं जगाम वै ॥ ३२ ॥ गंधर्वाः किंनरा यक्षास्तथा चाप्सरसां गणाः ॥
समासीनाः स्तुपरितो गानबंधुश्च मध्यतः ॥ ३३ ॥ गानविद्यां समापन्ना सिक्षिता स्तेन पक्षिणा ॥ स्निग्धकंठस्वरास्तत्र स
मासीनामुदान्विताः ॥ ३४ ॥ ततो नारदमालोक्य गानबंधुरुवाच ह ॥ प्रणिपत्य यथान्यायं स्वागतेनाभ्यपूजयत् ॥ ३५ ॥
किमर्थं भगवानत्र चागतोसि महाद्युते ॥ किं कार्यं हि महाब्रह्मन् ब्रूहि किं करवाणि ते ॥ ३६ ॥ तच्छ्रुत्वा नारदो धीमान्प्रत्यु
वाच सुपक्षिणम् ॥ उलूकेंद्र महाप्राज्ञ श्रृणु सर्वं यथातथम् ॥ ३७ ॥ ममवृत्तं प्रवक्ष्यामि तथ्यभूतं महाद्युते ॥ वैकुंठनगरे

धीमन्नारायणात्समीपगम्॥३०॥मां विनिर्धूय तं हृष्टं समाहूय चतुर्मुखम्॥लक्ष्मीसमन्वितो विष्णुरश्वरोद्यानमुत्तमम्॥३९॥ब्रह्मा
दयो वयं सर्वे निरस्ताः स्थानतश्च्युताः॥कौशिकाद्याः समासीना गानयोगैर्नवै हरिम्॥४०॥समाराध्यैव संप्राप्ता गाणापत्यं यथासु
खम्॥तेनाहमतिदुःखार्तो पितृ प्राप्तुमपातपः॥४१॥यद्दत्तं यत्कृतं चैव यच्चापि श्रुतमेव हि॥यदधीतं च गानस्य कलां नार्हति
षोडशीम्॥४२॥विस्मितो महिमान्यपूजकस्य गानयोगस्य वै ततः॥पश्चात्तापं च मे दृष्ट्वा मां च नारायणोऽब्रवीत्॥४३॥उलूकं गच्छ दे
वर्षे गानबंधुं मति र्यदि॥गाने च वर्तते ब्रह्मन् तत्र त्वं गानमाप्स्यसि॥४४॥इत्यहं प्रेषितस्तेन त्वत्समीपमिहागतः॥किं करिष्या
मि शिष्योऽहं तव मां पालयाव्यय॥४५॥नारदं प्राह धर्मात्मा गानबंधुर्महायशाः॥शृणु नारद यद्वृत्तं पुरा मम महामते॥४६॥अ
त्याश्चर्यसमायुक्तं सर्वपापहरं शुभम्॥भुवनेश इति ख्यातो राजा भूद्धार्मिकः पुरा॥४७॥अश्वमेधसहस्रैश्च वाजपेयायुतेन
च॥गवां कोटि र्बुदैर्नैव सुवर्णस्य तथैव च॥४८॥ग्रामसारथहस्तीनां गवाश्वानां तथैव च॥दत्त्वा स राजा विप्रेभ्यो मेदिनीं परि
पालयन्॥४९॥न्यवारयत्स्वके राज्ये गानयोगेन केशवम्॥अन्यं वा गानयोगेन गायन् यदि स मे भवेत्॥५०॥वध्यं स वर्तिमानस्मा
द्देशाद्विष्णुः परः पुमान्॥नब्राह्मणो श्च गातव्यं महद्भिर्वेदमुत्तमम्॥५१॥गानयोगेन सर्वत्र स्त्रियो गायंतु नित्यशः॥सूतमागधसंबाश्च

गीतं तेकारयंतुवै ॥५२॥ इत्याज्ञाप्य महातेजाः राज्यं वै पर्यपालयत् ॥ तस्य राज्ञः पुराभ्यासे हरिमित्र इति स्मृतः ॥५३॥ ब्राह्मणो वि
ष्णुभक्तश्च सर्वद्वंद्वविवर्जितः ॥ नदीपुलिनमासाद्य प्रतिमां हरेः शुभाम् ॥ अभ्यर्च्य च यथाशास्त्रं धूपं दद्यात्तरं बहु ॥ मिष्टान्नं
पायसं दत्त्वा हरिमावेद्य पूपकम् ॥५५॥ प्रणिपत्य यथान्यायं तत्र विन्यस्तमानसः ॥ अगायत हरिं तत्र तालवर्णलयान्वितम् ॥५६॥
अतीव स्नेहसंयुक्तस्तद्गतेनांतरात्मना ॥ ततो राज्ञः समादेशाद्दूतास्तस्य समागताः ॥५७॥ तद्दर्शनादिसकलं निधूय च समंत
तः ॥ ब्राह्मणं च गृहीत्वा ते राज्ञि सम्यङ्न्यवेदयन् ॥५८॥ ततो राजा द्विजश्रेष्ठं परिभर्त्स्य सुदुर्मनाः ॥ राज्यान्निर्वासयामास ह

दानादिकर्म

त्वा सर्वं धनादिकम् ॥ प्रतिमां च हरेश्चैव नापश्यत्स्य दृष्ट्या ॥ ततः कालेन महता कालधर्ममुपेयिवान् ॥६०॥ लोकांतरमनु
प्राप्य उलूकं देहमाश्रितः ॥ सर्वत्र गच्छमानोपि भक्ष्यं किंचिन्न चाप्तवान् ॥६१॥ क्षुधार्तस्य सदा खिन्नो यममाह सुदुःखितः ॥ क्षु
त्पीडा वर्तते चैव दुर्गतस्य सदा मम ॥६२॥ मया पापं कृतं किं च किं करिष्यामि वै यम ॥ ततस्तं धर्मराट् प्राह धर्माधर्मप्रदर्शकः ॥६
३॥ कृत्वा विष्णुं महत्पापं कृतमस्ति नतोनघ ॥ हरिमित्रं प्रति पुरा वासुदेवपरायणम् ॥६४॥ हरिमित्रेण तं पापं वासुदेवार्चना
दिषु ॥ तेन पापेन संप्राप्तः क्षुधाधत्वोसि दानघ ॥६५॥ दानयज्ञादिकं सर्वं भ्रष्टं तेन नराधिप ॥ गीतनादलयोपेतं गायमानं सदा
हरिम् ॥६६॥ हरिमित्रं समाहूय हृतवानसि तन्महम् ॥ उपहारादिकं चैव वासुदेवस्य सन्निधौ ॥६७॥ तव भृत्याः समाहृत्य

श्र·ग·॥१०३॥

ज्यायं चक्रुर्लवाञ्छया ॥ हरेः कीर्त्तिं विना चान्यद्भूलतो न न कृत्यवै ॥ ६८ ॥ तस्मिन् क्षणे त्विमं देहं खादन्नित्यं क्षुधान्वि
तः ॥ महानिरयसंस्थस्त्वं यावन्मन्वंतरं भवेत् ॥ ६९ ॥ मन्वंतरे ततोतीते भूम्यां त्वं श्वा भविष्यसि ॥ ततः कालेन महता
मानुष्यमनुप्स्यसे ॥ ७० ॥ एवमुक्त्वा यमो विद्वांस्तत्रैवांतरधीयत ॥ सोहं नारद भूपाल पुरेदानीमुल्कताम् ॥ ७१ ॥ लब्ध
वान्नरकं मर्दोषेणाहरिमित्रकृतेन वै ॥ ततो मांसनशीलेहं कोटरे लब्धवान्मुने ॥ ७२ ॥ पूर्वोमृतकदेहो मे भक्षनाय हुपस्थि
तः ॥ क्षुधान्वितोहं तं देहं त्वं भोक्तुं प्राक्रमं ततः ॥ ७३ ॥ तत्क्षणाद्दैवयोगेन हरिमित्रो महायशाः ॥ विमानेनार्कवर्णेन स्तुय
मानोप्सरोगणैः ॥ ७४ ॥ विष्णुदूतैः परिवृतो पथानेनागते द्विज ॥ विष्णुभक्तो महातेजाः पथि मां दृष्टवान्प्रभुः ॥ ७५ ॥ भुवनेशरी
रं तद्दृष्ट्वा नरकसंनिधौ ॥ दृष्टोहं तेन दयया शवसंनिधिसंस्थितः ॥ ७६ ॥ भुवनेशस्य नृपते देहोयं दृश्यते खग ॥ उत्कृत्वं च भि
मिदं खादितुं प्रोद्यतोसि भवः ॥ ७७ ॥ तच्छ्रुत्वा हरिमित्राय प्रणम्य विनयान्वितः ॥ कृतांजलिपुटो भूत्वा बहुमानपुरःसरम् ॥
तत्सर्वं पूर्ववृत्तांतं नारदोस्मै न्यवेदयम् ॥ पुरा पापं कृतं त्वयि यत्तस्य पाकोयमागतः ॥ ७८ ॥ यावन्मन्वंतरं विप्र खादिष्यामि शवं त्वि
मम् ॥ ततः श्वाहं भविष्यामि तनो नरः ॥ ८० ॥ एतदाकर्ण्य करुणो हरिमित्रो महायशाः ॥ कृपया मां समाचष्ट श्रृणु लुब्धक मही

भविष्यामि

किय

॥१०३

पते॥८१॥मयि त्वयापराद्धं पतन्त सर्वेसांत्वानहम्॥शशापोथ दर्शनं यानुन चक्षुषा त्वं भविष्यसि॥८२॥त्वामत्य गानयोगश्च प्राप्स्युम
त्प्रमादतः॥स्तुहि विष्णुं च गानेन जित्वा पापस्य यातनाम्॥८३॥सुरविद्याधराणां च गंधर्वाप्सरसां तथा॥गानाचार्यो भवेथास्त्वं भक्ष्य
भोज्यसमन्वितः॥८४॥ततः कनिपयाहोभिः सर्वं भद्रं भविष्यति॥हरिमित्र वचस्तत्र विष्णुदूतोऽपि बृंहिते॥८५॥सर्वं निरयपापं मे
क्षणादेव व्यनाशयत्॥प्रशस्त्या विष्णुभक्तास्तु ईदृशीं करुणां द्विज॥८६॥कृत्वापराधिनोकानामपि दुःखं व्यपोहति॥श्रमत
स्यं दिवचनमुत्क्रामत्रयपो हरिं॥पूर्वं निकथितं येन गानाचार्यो हमुत्तमः॥प्राप्स्यामि हरिमित्तेन हरिमित्रप्रसादतः॥८८॥नारदेन
दनुवर्णितं मया पूर्वजन्मचरितं महाद्भुतम्॥पुनः शृणोति हरिमित्य ये तेन साम प्रयाति भुवनं गदाभृतः॥८९॥इत्यार्षे रामायणे श्रादि

नो ५

काव्येऽद्भुतोत्तरकांडे हरिमित्रोपाख्यानं षष्ठः सर्गः॥६॥गानबंधुस्ततः प्राह नारदं मुनिसत्तमम्॥एते किंनरसंघा वै गंधर्वाप्सरसां गणाः॥
गानाचार्यमुपेत्य कं मां गानशिक्षार्थमागताः॥१॥तपसा नैव शक्या वा गानविद्या तपोधन॥तस्मात् श्रमेण युक्तश्च मनस्त्वं गानमानु
हि॥२॥एवमुक्तो मुनिस्तस्मै प्रणिपत्य जगौ यथा॥तच्छृणुष्व द्विजश्रेष्ठ वासुदेवं नमस्य च॥३॥एकेनैव मुक्तस्तु नारदो मुनिसत्त
मः॥शिक्षाक्रमेणानंयुक्तस्तं च गानमशिक्षयत्॥गानबंधुस्तमाहेदं त्यक्तलज्जो भवाधुना॥स्त्रीसंगमे तथा गीते क्षुते व्याख्या
नसंगमे॥व्यवहारे च धान्यानां अर्थानां च तथैव च॥आयव्यये तथा नित्यं त्यक्तलज्जस्तु वै भवेत्॥६॥न कुंठितैर्मूढैर्न नित्यं प्रा

वरत्नादिभिः॥६॥हस्तविक्षेपभावेन व्यादितास्येन वै न हि॥७॥निर्वृत्तजिह्वायोगेन नागेयं हि कथंचन॥न गायेदूर्ध्वबाहुश्च न
नोर्ध्वदृष्टिः कथंचन॥८॥स्वांगं निरीक्ष्यमाणो न परमप्रेक्षितात्तथा॥हासो भयं तथा कंपस्तथान्यत्र स्मृतिः पुनः॥९॥एता
निसमरूपाणि गानयोगे महामते॥नैकहस्तेन शस्येत तालः संबद्धते मुने॥१०॥क्षुधार्तेन रोगेण तृषार्तेन विकलेन तथैव च॥गान
योगो न कर्तव्यो नांधकारे कथंचन॥११॥एवमादीनि योग्यानि कर्तव्यानि महामुने॥एवमुक्तः स भगवान्नारदो विधिरक्षणे॥१२
अशिक्षयत्तथा गीतं दिव्यं वर्षसहस्रकम्॥ततः समस्तसंपन्नो गीतप्रस्तारिकादिषु॥१३॥विपंच्यादिषु संपन्नः सर्वस्वरविभागवि
त्॥अयुतानि च षट्त्रिंशत्स्वराणां शिक्षितानि च॥१४॥स्वराणां भेदयोगेन ज्ञानवान्मुनिसत्तमः॥ततो गंधर्वसंघाश्च किन्नराः किन्
नराणां गणास्तथा॥१५॥मुनिना महता युक्ताः प्रीतियुक्ता भवंति ते॥गानबंधुं मुनिः प्राह प्राप्य गानमनुत्तमम्॥१६॥त्वां समासाद्य सं
पन्नस्त्वं हि गीतविशारदः॥धांक्षशान्तो महाप्राज्ञ किमथाप्यं करोमि ते॥१७॥गानबंधुस्ततः प्राह नारदं मुनिपुंगवम्॥ब्रह्मणो
दिवसे ब्रह्मन्मनवस्तु चतुर्दश॥तत्र लोकाः सपातालाः नो वै भविष्यंति महामुने॥तावन्मे स्याद्यशोभागस्तावन्मे परमं शुभम्॥१८
मनसाध्यापितं मेध्याद्दाक्षिण्यान्मुनिसत्तमः॥१९॥एवमुक्तं प्राह देवर्षिः सर्वं तेऽस्तु मनोगतम्॥२०॥अतीते कल्पसंयोगे गरुडस्त्वं भविष्यसि॥

गणकापकाः

ग्गारादच्युतस्यसायुज्यं तस्य त्वस्यसे ॥२१॥ स्वस्तिते ऽस्तु महाप्राज्ञ गमिष्यामि प्रसीद मे ॥ एवमुक्त्वा ययौ विप्रो जगौ तुंबुरुरुत्तमम् ॥२२॥
तुंबुरोश्च गृहाभ्याशे ददर्श विकृताकृतीन् ॥ कृत्तबाहून् पादांश्च कृत्तनासाक्षिवक्षसः ॥२३॥ कृंतोत्तमांगान् ना(?)ंश्च छिन्नभिन्नक
लेवरान् ॥ पुंस्त्रियश्च विकृतान् विकृतादर्शितान् बहून् ॥२४॥ नारदेन च ते प्रोक्ताः के यूयं कृत विग्रहाः ॥ नारदं प्रोचुरागास्ते त्वया कृंताद
कौरयम् ॥२५॥ वयं रागाश्च रागिण्यो गानेन भिन्नसंधिनः ॥ भवता गीयते यर्हि तर्ह्यवस्थेदृशी हि नः ॥२६॥ पुनस्तुंबुरुगानेन छिन्न
भिन्नप्ररोहणम् ॥ तुंबुरुर्जीवयत्येष मारयस्यसि नारद ॥२७॥ तदाश्चर्यं महत् दृष्ट्वा श्रुत्वा च विस्मयान्वितः ॥ धिक्कृतक्रोऽजगामाथ नारदो
विजनार्दनम् ॥२८॥ श्वेतद्वीपे स भगवान् नारदं प्राह माधवः ॥ गानबंधो वयस्मानं तेनासि त्वं न पारगः ॥२९॥ तुंबुरोः सदृशो नास्ति गाने
नानेन नारद ॥ मनोर्वैवस्वतस्याहमष्टाविंशतिमे युगे ॥३०॥ द्वापरांते भविष्यामि यदुवंशकुलोद्भवः ॥ देवक्यां वसुदेवस्य कृष्णनाम्ना महामु
ने ॥३१॥ तदानीं मां समागम्य स्मारयेथा यथातथम् ॥ तत्र त्वां गानसंपन्नं करिष्यामि महामुने ॥३२॥ तावत्कालं यथायोगं देवगंधर्वयोनिषु ॥
शिक्षयेथा यथान्यायमित्युक्तोऽन्तरधीयत ॥३३॥ ततो मुनिः प्रणम्यैनं वीणावादनतत्परः ॥ देवर्षिर्देवसंकाशः सर्वाभरणभूषितः ॥३४॥ तप
तांनि धिरत्यर्थं वासुदेवपरायणः ॥ ~~ब्रह्मलोकं समासाद्य कस्मिंश्चित्काल~~ स्कंधे विपंचीमासाद्य सर्वलोकांश्चचारिणः ॥३५॥ वारुणं याम्यमाग्नेय
मैंद्रं कौबेरमेव च ॥ वायव्यं च तथैशानं समदः प्राप्य धर्मवित् ॥३६॥ गायमानो हरिं सम्यक् वीणावाद्यविचक्षणः ॥ गंधर्वाप्सरसां संघैः पू
ज्यमानस्ततस्ततः ॥३७॥ ब्रह्मलोकं समासाद्य कस्मिंश्चित्कालपर्यये ॥ हाहाहूहूश्च गंधर्वौ गीतवाद्यविशारदौ ॥३८॥ ब्रह्मणो गायकौ दि
व्यौ नित्यं गंधर्वसत्तमौ ॥ तत्र ताभ्यां समासाद्य गायमानो हरिं मुनिः ॥३९॥ ब्रह्मणा च महातेजाः पूजितो मुनिसत्तमः ॥ तं प्रणम्य महात्मानं

मो

सर्वलोकपितामहम् ॥४०॥ चचार च यथाकामं सर्वलोकेषु नारदः ॥ पुनः कालेन महता गृहं प्राप्य च तुंबुरोः ॥४१॥ वीणामादाय तत्र
स्थितस्तत्रस्थैरप्यवक्षितः ॥ स्वरकन्याश्च तत्रस्थाः षड्जाद्याः सप्त चैव ताः ॥४२॥ व्रीडितो भगवान् दृष्ट्वा निर्गतश्च स सत्वरः ॥ शि
क्षयामास बहुशस्तत्र तत्र महामुनिः ॥४३॥ कालेनातीतेन ततो विष्णुरवतीर्णो जगन्मयः ॥ देवक्यां वसुदेवस्य यादवो सो महाद्युतिः ॥४४॥
उग्रवियोगसंतप्तो नारदोपि महामुनिः ॥ स स्वरांगना दृष्ट्वा गानविद्याविशारदः ॥४५॥ ययौ रैवतके शैलं प्रणिपत्य महामुनिः ॥
पद्मापयदशेषं तत् श्वेतद्वीपे त्वयाश्रुतं ॥४६॥ नारायणेन कथितं गानयोगार्थमुत्तमम् ॥ तच्छ्रुत्वा प्रहसन् कृष्णः प्राह जांबवतीं मु
दा ॥४७॥ एनं मुनिवरं भद्रे शिक्षयस्व यथाविधि ॥ वीणागानसमायोगे तथेत्याह च सा पतिं ॥४८॥ प्रहसंतीय यथायोगं शिक्षयामास तं मु
निम् ॥ ततः संवत्सरे पूर्णे नारदं प्राह केशवः ॥४९॥ सत्यासमीपमागच्छ शिक्षयस्व तया पुनः ॥ तथेत्युक्त्वा सत्यभामां प्रणिपत्य ययौ मुनिः ॥
५०॥ तया स शिक्षितो विद्वान् पूर्णे संवत्सरे ततः ॥ वासुदेवनियुक्तोसौ रुक्मिणीसदनं गतः ॥५१॥ अंगनाभिस्तनस्ताभिर्दासीभिर्मुनिसत्त
मः ॥ उक्तोसौ गायमानोपि न स्वरं वेत्सि वै मुनिः ॥५२॥ ततः श्रमेण महता वत्सरद्वयसंयुतम् ॥ शिक्षितोसौ तदा देव्या रुक्मिण्याधिजगौ मुनिः
॥५३॥ ततः स्वरांगना प्राप्तनतीयोगं महामुनिम् ॥ प्राहुः प्रहृष्टमनसो भगवान्स्वयमेव महामुनिम् ॥५४॥ अशिक्षयदमेयात्मा गानयोगमनुत्तम
म् ॥ कृष्णसदृशेन गानेन तस्य याताः स्वरांगनाः ॥५५॥ ब्रह्मानंदः समभवत् नारदस्य स्वचेतसि ॥ ततो देवादयो दोषाः सर्वेऽस्तं गता द्विज ॥५६॥
ईर्ष्या च तुंबुरे यासीन्नारदस्य हि सा गता ॥ ततो ननर्त देवर्षिः प्रणिपत्य जनार्दनम् ॥ उवाच च हृषीकेशः सर्वज्ञस्त्वं महामुने ॥ प्रविश्य गानयो
गेन गायस्व मम संनिधौ ॥५७॥ एवं ते प्रार्थितं प्राप्तं मम लोके तथैव च ॥ नित्यं तुंबुरुणा सार्द्धं गायस्व च यथा तथम् ॥५८॥ एवमुक्तो मुनिस्त

60

त्र यथा योगे च चारसः ॥ यथा संपूजयेत्कृष्णं हृदं भुवननायकम् ॥ ६० ॥ तथा जगौ हरेस्तत्र नियोगाच्छंकरालये ॥ रुक्मिण्या चैव स
त्यया जांबवत्या महामुनिः ॥ ६१ ॥ कृष्णेन च द्विजश्रेष्ठ गानश्रुतिविशारदः ॥ एतत्ते मुनिशार्दूल प्रोक्तं गीतक्रमं मया ॥ ६२ ॥ श्रा
न्तगो वासुदेवाख्यं गायमानो निशं द्विज ॥ हरेः सालोक्यमाप्नोति सर्वयज्ञफलं लभेत् ॥ ६३ ॥ अन्यथा नरकं गच्छेत् गायमानोन्यदे
वहि ॥ कर्मणा मनसा वाचा वासुदेवपरायणाः ॥ ६४ ॥ गायन्नृश्रवन्नत माप्नोति सर्वयज्ञफलं लभेत् ॥ कथितमिदमपूर्वं जान
कीजन्मपूर्वं श्रुतिसुखमतिगुह्यं स्नेहतस्ते ह सर्वम् ॥ कलुषकलिविपक्षं भव्यदानैकदक्षं नभिरिदमतिवंद्यं सर्वदेवाभिवंद्य
म् ॥ ६६ ॥ इत्यार्षे रामायणे अद्भुतोत्तरकांडे नारदगानप्राप्तिर्नाम सप्तमः सर्गः ॥ ७ ॥ यथा सा शोणितोद्भूता राक्षसीगर्भसंभवा ॥ पृथ्वी भूमित
नोत्पन्ना जानकी च यथाभवत् ॥ १ ॥ सीता तच्छृणु विप्रेन्द्र वर्णयामि तवानघ ॥ दशास्यो रावणो नाम तपस्तप्तुं तदारुहत् ॥ २ ॥
त्रैलोक्यस्याधिपत्याय अजरामरणाय च ॥ बहुवर्षं तपस्तप्त्वा ज्वलनार्कसमोज्वलः ॥ ३ ॥ ततस्तेजसा जगत्सर्वं दह्यमानं पदाम
वत् ॥ प्रजापतिस्तदागत्य रावणं वाक्यमब्रवीत् ॥ ४ ॥ पौलस्त्य विरमाद्य त्वं न तपो मम वाक्यतः ॥ तपसोग्रेण महता लोका भस्मी
कृता इव ॥ ५ ॥ वरं ददामि ते वत्स यत्ते मनसि वर्तते ॥ तपोधनं नभस्वाद्य वरदानं मतं ईप्सितम् ॥ ६ ॥ न्यवारयत्स चक्षूंषि सूर्यबिंबावलोक
नात् ॥ प्रणिपत्य जगन्नाथं वरं वव्रे स रावणः ॥ ७ ॥ देहि मे अमरत्वं मे वरदोसि यदा प्रभुः ॥ तदा कर्णपिचो ब्रह्मा पुनः प्राह स रावणम् ॥

॥८॥ न हि सर्वामरत्वं ते वरमन्यं वृणुष्व मे ॥ ततः स रावणः प्राह क्रूरवादी हि राक्षसः ॥९॥ सुरासुरा यक्षाः पिशाचोरगराक्षसाः ॥ वि-
द्याधराः किन्नरा वा तथैवाप्सरसां गणाः ॥१०॥ न हन्युर्मां कथं चित्ते देहि मे वरमुत्तमम् ॥ अन्यच्च ते रतो वक्ष्यन्तु तच्छृणुष्व पिताम-
ह ॥११॥ आत्मजो दुहिता लक्ष्मीरत्यर्थं नापि तां भवेत् ॥ तदा मृत्युर्मम भवेद्यदि कन्यामिकांक्षति ॥१२॥ तथेत्युक्त्वा जगामासौ ब्र-
ह्मा लोकपितामहः ॥ रावणोऽगणयद्रक्षो मत्वा तान् तृणवत् द्विज ॥१३॥ ब्रह्मदत्तवरो राजा रावणो बलदर्पितः ॥ त्रैलोक्यजय-
सर्वस्वं प्राप्तवान् बाहुवीर्यतः ॥१४॥ एकदा रावणो राजा दंडकारण्यमागतः ॥ तत्रर्षीन् स कल्प्यांश्च दृष्ट्वा मनसि चिंतयत् ॥
१५॥ एतान जित्वा हि कथं त्रिलोकजयमागहम् ॥ एषां वधेन च श्रेयो न पश्यामि महात्मनाम् ॥१६॥ दुरात्मा स विचिंत्यैतत् प्राह
तान्मुनिपुंगवान् ॥ अहं सर्वस्य जगतः शास्ता च जयमागहम् ॥१७॥ भवतां जयमाकांक्षे जयं ददेत द्विजर्षभाः ॥ इत्युक्त्वा स शराग्रे-
णास्तनाच्छोणितं ततः ॥१८॥ वल्नादाकृष्य तेषां वै कलशे स्थापयत् प्रभुः ॥ तत्र गृत्समदो नाम शतं पिता द्विजः ॥१९॥ दुहित्रर्थे भा- उत्त३
दु२ र्यया स प्रार्थितो भगवान्मुनिः ॥ लक्ष्मीर्मे दुहिता भूयादित्य सौ कलशे प्रभुः ॥२०॥ दुग्धं चार हरस्तत्र कुशाग्रेण च मंत्रितम् ॥ स्थाप-
यत्येष नियतं तदह निर्दधो व्रतम् ॥२१॥ तद्दिने दैवयोगेन कलशे तत्र रावणः ॥ मुनीनां शोणितं स्थाप्य गृहिता स्वगृहं ययौ ॥२२॥

(37)

शोणितं १

भार्यां मंदोदरीं प्राह कलशं रक्ष सुंदरि ॥ विषादप्यधिकं विद्धि कलशेस्थितम् ॥२३॥ न देयं ना विना भक्ष्यं मुनीनां शोणितं त्विदम् ॥ त्रैलोक्यज
न सर्वस्वं पर्याप्तं मे वसुंदरि ॥२४॥ गृहे स्थाप्य प्रयत्नेन इत्युक्त्वा स तथाकरोत् ॥ त्रैलोक्यजयलालसेन रावणो लोकरावणः ॥२५॥ देवदानवय
क्षाणां गंधर्वाणां च कन्यकाः ॥ आहृत्य रमयामास मंदरे मलयपर्वते ॥२६॥ हिमवन्मेरुविंध्यादौ रमणीयवने तथा ॥ मंदोदरी त
था दृष्ट्वा पतिं सा हि मनस्विनी ॥२७॥ आत्मानं गर्हयामास भर्तृस्नेहमपश्यती ॥ धिग्जीवितं हि नारीणां यौवनं कुलमेव च ॥
२८॥ वंचिताः पतिना याः स्युस्तस्मान्मे मरणं वरम् ॥ उग्रमेकलशे दिष्टं शोणितं क्ष्वेडतोधिकम् ॥२९॥ पपौ मरणमाकांक्ष्य
पतिना वंचिता सती ॥ लक्ष्मीसरणादुग्धेन मिश्रिता च्छोणितादभूत् ॥३०॥ सद्योरावणकांताया गर्भो ज्वलनसंनिभः ॥ ततो
विस्मयमापन्ना सा हि मंदोदरी शुभा ॥३१॥ पीतं विषाधिकं रक्तं गर्भस्तेनाभवन्मम ॥ इति संचिंतपत्येव भर्ता प्रवासितो मम ॥३२
कामिनीभिः क्रीडते स कामी भर्ता हि रावणः ॥ संवत्सरमिदं भर्त्रा मत्समेव सतिर्न हि ॥३३॥ किं वक्ष्यमया साध्व्या गर्भिण्या भर्तृसंत
दि ॥ चिंतया दग्धगात्री च तीर्थसेवनछद्मना ॥३४॥ विमानवरमारुह्य कुरुक्षेत्रं जगाम सा ॥ तत्र गर्भं विनिःसृष्य निचखान भुव
स्तले ॥३५॥ स्नात्वा सरस्वतीतोये पुनरायात्स्वमालयम् ॥ न वेदितं वै कस्मैचिद्रहःकार्यं सुगोपितम् ॥ ततः कालेन कियता ज
नकर्षिर्महामनाः ॥ कुरुक्षेत्रं समासाद्य लांगलं यज्ञमावहत् ॥३७॥ स्वर्णलांगलमादाय यज्ञभूमिं च कर्षतः ॥ स्वर्णलांग

32

॥ग॰रा॰७॥

गसीतां ततः कन्यैका प्रोत्थिता भवत्॥३८॥ पुष्पवृष्टिश्च महती पपात कन्यको परि॥ तत् दृष्ट्वा महदाश्चर्यं राजा विस्मय
मागतः॥३९॥ कर्तव्ये मूढतां प्राप्त ततः विभूत्तरस्वती॥ राजन् गृहाण कन्यां त्वं पालयैनां महाप्रभाम्॥४०॥ ज्वलज्ज्वना
कसमां दिव्यां महत्कार्यं तवालये॥ भविष्यति महाभाग क्षेमं च जगतो नया॥४१॥ यज्ञः संपाद्यतां राजन् नायं विघ्नस्त
वानघ॥ नामास्याः किल सीतेति सीता सीताया उत्थिता यतः॥४२॥ कन्यये नं दुहितरमित्युक्त्वा वाक् तिरोगता॥ तच्छ्रु
त्वा प्रीतिमान् राजा यज्ञं कृत्वा महाधनम्॥४३॥ जगाम सीतामादाय महिषीभ्यश्च तां ददौ॥ एतत्ते कथितं विप्र सीताजन्म
कारणम्॥४४॥ श्रुत्वैतत्सर्वपापेभ्यो मुक्तो भवति मानवः॥ जनकदुहितृजन्म श्रावयित्वा च श्रुत्वा न पुनरिह जन्म प्राप्नु
यात्तु राघवांश्च॥ दशरथसुतकांता तस्य गेहं कदाचिन्न त्यजति स च सर्वैः पातकैर्मुच्यते च॥४५॥ इत्यार्षे रामायणे वाल्मीकीये
श्रा॰ रघुतोत्तरकांडे सीतोत्पत्तिर्नामाष्टमः सर्गः॥८॥ रामः सीतां परिणयं कृत्वा दशरथादिभिः॥ भ्रातृभिश्चापि सहितो भार्य
या सह सीतया॥१॥ अयोध्यां गंतुमारेभे नानावाद्यरवैः सह॥ प्राचीकि नंदनो रामो मार्गे वीरो रेणुकासुतः॥२॥ तस्य दाशरथेः श्रु
त्वा रामस्याक्लिष्टकर्मणः॥ विवाहकौतुकं वीरः पथि तेन समागमत्॥३॥ धनुरादाय तद्दिव्यं क्षत्रियाणां निवर्हणम्॥ जिज्ञासमानो राम
स्य वीर्यं दाशरथेस्तदा॥४॥ स तमभ्यागतं दृष्ट्वा उद्यतास्त्रमवस्थितम्॥ प्रहसन्निव विप्रेंद्रं रामो वचनमब्रवीत्॥५॥ स्वागतं ते मुनि

॥

श्रेष्ठ किं कार्यं करवाणि ते ॥ प्रोवाच भार्गवो वाक्यं त्वागतेन किमस्ति मे ॥६॥ क्षत्रकालं हि राजेन्द्र धनुरेतन्ममास्ति हि ॥ समारोपय यत्नेन यदि
दि शक्तोऽसि राघव ॥७॥ इत्युक्तस्त्वाह भगवन् त्वं नाधिक्षेप्तुमर्हसि ॥ न हि मया स्वधर्मेणाँ क्षत्रियाणां द्विजातिषु ॥८॥ ईक्ष्वाकूणां विशेषेण बाहुवी
र्येण कत्थनम् ॥ तमेवं वादिनं तत्र रामो वचनमब्रवीत् ॥९॥ अलं ते वै तूपदेशेन धनुरापूरय राघव ॥ ततो जग्राह रोषेण क्षत्रियर्षभसूदनं ॥१०॥
रामो दाशरथिर्दिव्यं हस्ताद्रामस्य कार्मुकम् ॥ धनुरारोपयामास सलीलमिव राघवः ॥११॥ ज्याशब्दमकरोत्तत्र स्मयमानः स वीर्यवान् ॥ त
स्य शब्देन भूतानि वित्रसन्त्यशनेरिव ॥१२॥ अब्रवीच्च तथा रामं रामो दाशरथिस्तदा ॥ इदमारोपितं ब्रह्मन् किमन्यत्करवाणि ते ॥१३॥ तस्य
रामो ददौ दिव्यं जामदग्न्यो महाबलः ॥ शरमाकर्णदेशान्तं त्वं समाकृष्यतामिति ॥१४॥ तच्छ्रुत्वा प्राब्रवीद्रामः प्रदीप्तश्चैव मन्युना ॥ श्रूयते
क्षम्यते चैव दर्पपूर्णोऽसि भार्गव ॥१५॥ त्वया ह्यतिगतं तेजः क्षत्रियेभ्यो विशेषतः ॥ पितामहप्रसादेन मां क्षिपस्यधुना तथा ॥१६॥ प
श्य मां स्वेन रूपेण चक्षुस्ते वितराम्यहम् ॥ ततो रामशरीरे वै रामो पश्यत भार्गवः ॥१७॥ आदित्यान्वसवो रुद्रान्साध्यांश्च समरुद्गणान्
॥ पितॄन्हुताशनांश्चैव नक्षत्राणि ग्रहांस्तथा ॥१८॥ गंधर्वान्राक्षसान्यक्षान्नदीस्तीर्थानि यानि वै ॥ ऋषीन्वैखानसविल्यांश्च ब्रह्मभू
तान्सनातनान् ॥१९॥ देवर्षींश्चैव कार्त्स्न्येन समुद्रान्पर्वतांस्तथा ॥ वेदांश्च सोपनिषदान्वषट्कारान्सलाध्वरैः ॥२०॥ अत्र चापत्वं बिसामा

तको १

उ॰

निधनुर्वेदांश्च सर्वशः ॥ विष्णुतो मे वरं दानि वर्षाणि च महाव्रत ॥२०॥ ततः स भगवान् विष्णुस्तं वै वाराणुमोचहा ॥ शुष्काशनि सना
कीर्णमहोल्काभिश्च सुव्रत ॥२२॥ पांशुवर्षेण महता मेघवर्षैश्च केवलम् ॥ भूमिकंपैः स निर्घातैर्नादैश्च विपुलैरपि ॥२३॥
मार्गं विविद्धं कृत्वा तेजश्चाक्षिप्य केशवं मुनिः ॥ ज्ञात्वा गर्वरितो वारणो राम वाहु प्रवेवितः ॥२४॥ स तु विहृत्य तां गत्वा प्रतिलभ्य
म्य च चेतनाम् ॥ रामः प्रत्यागतप्राणः प्राणामद्विष्णुतेजसम् ॥२५॥ विष्णुना सोऽभ्यनुज्ञातो महेंद्रमगमत्पुनः ॥ भीतश्च तत्र न्यव
सद्विभीतश्च महातपाः ॥२६॥ ततः संवत्सरेऽतीते गतौजसमवस्थितम् ॥ निर्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन् ॥२७॥ न वै
सम्यगिदं पुत्र विष्णुमासाद्य वै कृतम् ॥ स हि पूज्यश्च मान्यश्च त्रिषु लोकेषु सर्वदा ॥२८॥ गच्छ पुत्र नदीं पुण्यां वधूसरकृ
तां वपां ॥ तत्रोपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि ॥२९॥ दीप्तोदं नाम तत्तीर्थं यत्र मे प्रपितामहः ॥ भृगुः पूर्वं पुरो राम तप्तवान्प्रतुतं
तपः ॥ तत्तथा कृतवान् रामो भार्गवो वचनात् पितुः ॥ प्राप्तवांश्च पुनस्तेजो भरद्वाज महामुने ॥३०॥ य एतच्छृणुयाद्
रामचारित्रमुत्तमम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥३२॥ ततो रामो जानकीस्पृष्टपाणिः स्वतैर्भक्त्या मागधै
स्तूयमानः ॥ अयोध्यां सारैरास्तूतो देवसंघैः सउत्तरां कोशलां गमीं जगाम ॥३३॥ इत्यार्षे॰ वा॰ श्री॰ ॰ उत्तरकां॰ जामदग्न्यविश्वरूपद
र्शनं नाम सर्गः ॥८॥ अथ सीतालक्ष्मणाभ्यां सहकेनापि हेतुना ॥ जगाम विपिनं रामो दंडकारण्यमाश्रितः ॥१॥ तत्र गोदावरीती

॥१

35

रेपर्णशालां विधाय सः॥ रामेण लक्ष्मणेनापि रहितां जानकीं ततः॥२॥ आहरद्रावणो मोहाल्लंकायां तां च वासवत्॥ तामदृष्ट्वा ततो
रामो लक्ष्मणश्च महाबलः॥३॥ अटंतौ चाटवीं सर्वां सीतादर्शनलालसौ॥ रामस्य रुदतस्तत्र बाष्पवारिसमुद्भवा॥४॥ नदी वैत
रणी चाभूद्वक्षुषाश्रुसमुद्भवा॥ वितरत्यश्रु वै यस्मात्ततो वैतरणी स्मृता॥५॥ वितरणां तरणां यस्मान्नृणां स्नानेन तर्पणात्॥ ते
नापि कारणेनासौ नदी वैतरणी स्मृता॥६॥ नेत्रयोर्दूषिकायाश्च तत्र शैलास्ततोऽभवत्॥ सुग्रीवेण वानरेण सख्यं कृत्वं म
हामतिः॥७॥ ऋष्यमूकमगाद्रामो लक्ष्मणेनानुजेन च॥ पंचभिर्मंत्रिभिः सार्द्धं सुग्रीवो नाम वानरः॥८॥ यत्रास्ते वालिभ
यतः सोपश्यद्रामलक्ष्मणौ॥ चापबाणधरौ वीरौ गसंताविवचांबरम्॥९॥ नो दृष्ट्वा तु सुतं तत्र स्तो वालिपक्षाद्धमन्यत॥ प्रा
स्याप पद्भतमं तं भिक्षुरूपेण वानरम्॥१०॥ आत्मानं दर्शयामास हनूमान् रामलक्ष्मणौ॥ को भवानिति चोक्तेथ चतुर्बा
हुं किरीटिनम्॥११॥ शंखचक्रगदापाणिं वनमालाविभूषितम्॥ श्रीवत्सवक्षसं देवं पीतवाससमच्युतम्॥१२॥ लक्ष्मी
सरस्वतीभ्यां च संश्रितोभयपार्श्वकम्॥ ब्रह्मपुत्रैः सनंदाद्यैः स्तूयमानं समंततः॥१३॥ देवर्षिपितृगंधर्वैः सिद्धविद्याधरोर
गैः॥ सेव्यमानं महात्मानं पुंडरीकविलोचनम्॥१४॥ सहस्रसूर्यसंकाशं शतचंद्रशुभाननम्॥ फणासहस्रमत्युच्चं धारयं च लक्ष्म

॥अ॰रा॰९८॥

ताम्॥१५॥ अनंतं रामशिरसि आतपत्रं कृपागतैः॥ दधानं सर्वलोकेशं नागतं चैश्वसंस्तुतम्॥१६॥ आत्मानं दर्शयामास रामचंद्रो
हनूमते॥ तद्रूपं हनुमान् वीक्ष्य किमेतदिति विस्मितः॥१७॥ क्षणं निमील्य नयने पुनः सोपश्यदद्भुतम्॥ स्तुत्वा नत्वा च बहुधा
सोब्रवीद्राघवं वचः॥१८॥ अहं सुग्रीवसचिवो हनुमान्नाम वानरः॥ सुग्रीवप्रेषितोहं वै युवां विज्ञातुमागतः॥१९॥ दृष्ट्वा यु
वां च द्विभुजौ चापबाणधरौ परम्॥ आगत्य चान्यथा दृष्टो वद मे कौ भवानिति॥२०॥ इति पवनकुमारं व्याकुलं व्याहरंतं
किमिति कथमितीदं कंपमानं प्लवंगम्॥ कृतकरपुटसंगं मंधेयं भवंतं मधुरतरमुदारं रामचंद्रोब्रवीत्तम्॥२१॥ इत्याध्ये
वा॰ आ॰ श्र॰ हनुमच्चतुर्भुजदर्शनं नाम सर्गः॥१०॥ रामो हनुमते प्राह आत्मानं पुरुषोत्तमम्॥ वत्स वत्स हनूमंस्त्वं मतोय
स्थ्य वानरसि॥१॥ तते हं संप्रवक्ष्यामि शृणुष्वावहितो मम॥ अवाच्यमेतद्दिशायै मात्मगुह्यं सनातनम्॥२॥ यन्न देवा न
जानंति यतंतो पि द्विजातयः॥ इदं ज्ञानं समाश्रित्य ब्रह्मभूता द्विजोत्तमाः॥३॥ न संसारं प्रपश्यंति पूर्वे पि ब्रह्मवादिनः॥ गुह्या
द्गुह्यतमं साक्षाद्गोपनीयं प्रयत्नतः॥४॥ वक्ष्ये भक्तिमतो द्य त्वां भवतो ब्रह्मवादिनः॥ आत्मायः केवलः शुद्धः शांतः सूक्ष्मः
सनातनः॥५॥ अस्ति सर्वांतरः साक्षी चिन्मात्रं तमसः परः॥ सोंतर्यामी स पुरुषः स प्राणः स महेश्वरः॥६॥ स कालो ग्निस्तद्व्य

वि५

मायातः

॥१८॥

विश्वं

क्तं स यो देव इति श्रुतिः ॥ तस्माद्विजायते सर्वं तत्रैव प्रविलीयते ॥७॥ मायया याभावनावद्धः करोति विविधास्तनूः ॥ न चाप्ययं सं
सरति न च संसारयेत्प्रभुः ॥८॥ नायं पृथ्वी न सलिलं न तेजः पवनो नभः ॥ न प्राणो न मनो व्यक्तं न शब्दः स्पर्श एव वा ॥९॥ न रू
परसगंधाश्च नाहंकारस्तथैव च ॥ न पाणिपादौ नो पायुर्न चोपस्थं प्लवंगम ॥१०॥ न कर्ता न च भोक्ता च न च प्रकृतिपूरुषौ ॥
न माया नैव च प्राणाश्चैतन्यः परमार्थतः ॥११॥ यथा प्रकाशतमसोः संबंधो नोपपद्यते ॥ तद्वदेव न संबंधः प्रपंचपरमात्म
नोः ॥१२॥ छायातपौ यथा लोके परस्परविलक्षणौ ॥ तद्वत्प्रपंचपुरुषौ विभिन्नौ परमार्थतः ॥१३॥ यद्यात्मा मत्यतः स्व
स्थो विकारी स्यात्स्वभावतः ॥ न हि तस्य भवेन्मुक्तिर्जन्मांतरशतैरपि ॥१४॥ पश्यंति मुनयो मुक्ताः स्वात्मानं परमार्थतः ॥
विकारहीनं निर्दोषमानंदात्मानमव्ययम् ॥१५॥ अहं कर्ता सुखी दुःखी कृशः स्थूलेति या मतिः ॥ सा चाहंकर्तृसंबंधादात्मन्या
रोप्यते जनैः ॥१६॥ वदंति वेदविद्वांसः साक्षिणं प्रकृतेः परम् ॥ भोक्तारक्षयं बुध्वा सर्वत्र समवस्थितम् ॥१७॥ तस्मादज्ञानमू

मात्वज्ञानं

लोयं संसारः सर्वदेहिनाम् ॥ अज्ञानं तच्च जहति साधुसंगतिसंगतम् ॥१८॥ नित्योदितः स्वयंज्योतिः सर्वगः पुरुषः परः ॥ अहं
काराविवेकेन कर्ताहमिति मन्यते ॥१९॥ पश्यंति ऋषयो व्यक्तं नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिं बुद्ध्वा कारणं ब्रह्मवादि
नः ॥२०॥ तेनायं संगतो ह्यात्मा कूटस्थोऽपि निरंजनः ॥ आत्मानमक्षरं ब्रह्म नावबुद्धेत तत्त्वतः ॥२१॥ अनात्मन्यात्मविज्ञानं तस्माद्दुःखं

तथेतरम्॥ रागद्वेषादयो दोषाः सर्वे भ्रांतेर्निबंधनाः॥२२॥ कार्ये पस्यभवेद्दोषो पुरायं पापमिति श्रुतिः॥ तद्देवहि सर्वेषां स
र्वदेहसमुद्भवः॥२३॥ नित्यः सर्वत्रगो ह्यात्मा कूटस्थो दोषवर्जितः॥ एकः स भिद्यते भ्रांत्या मायया न स्वभावतः॥२४॥
तस्माददैतमेवाहुर्मुनयः परमार्थतः॥ भेदो व्यक्तस्वभावेन स च मात्मान्यसंश्रयः॥२५॥ यथा हि धूमसंपर्कादाका
शो मलिनो भवेत्॥ अंतःकरणजैर्भावैरात्मतत्त्वं न लिप्यते॥२६॥ यथा स्वप्रभया भाति केवलः स्फटिको मलः॥ उपा
धिहीनो विमलस्तथैवात्मा प्रकाशते॥२७॥ ज्ञानस्वरूपमेवाहुर्जगंति तद्विचक्षणाः॥ अर्थस्वरूपमाज्ञायन पश्यं
ति कुदृष्टयः॥२८॥ कूटस्थो निर्गुणो व्यापी चैतन्यं तु स्वभावतः॥ दृश्यते हेमरूपेषु पुरुषैर्भ्रांतिदृष्टिभिः॥२९॥ यथा संल
क्षते व्यक्तैः केवलः स्फाटिको जनैः॥ शुक्तिकाव्यवधानेन तद्वत्परमपूरुषः॥३०॥ तस्मादात्माऽक्षरः शुद्धो नित्यः सर्व
गतोऽव्ययः॥ उपासितव्यो मंतव्यः श्रोतव्यश्च मुमुक्षुभिः॥३१॥ यदा मनसि चैतन्यं भाति सर्वत्रगं सदा॥ योगिनोऽव्यवधा
नेन तदा संपद्यते स्वयम्॥३२॥ यदा सर्वाणि भूतानि स्वात्मन्येवाभिपश्यति॥ सर्वभूतेषु चात्मानं ब्रह्म संपद्यते तदा॥३३॥
यदा सर्वाणि भूतानि समाधिस्थो न पश्यति॥ एकीभूतः परेणासौ तदा भवति केवलः॥ यदा सर्वे प्रमुच्यंते कामा यस्य हृ

३१

११९

37

दिस्थिताः ॥ तदाह्यावमृतीभूत्वा क्षेमं गच्छति पंडितः ॥३५॥ यदाभूतपृथग्भावमेकं पश्यन्ति केवलः ॥ तदा सर्वैः प्रमुच्येत एकं तमनुप
श्यति ॥३६॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ यदा पश्यति चात्मानं केवलं परमार्थतः ॥३७॥ मायामात्रं जगत्कृत्स्नं
तदा भवति निर्वृतिः ॥ यदा जन्मजरादुःखव्याधीनामेकमेषजम् ॥ केवलं ब्रह्मविज्ञानं जायतेसौ तदा शिवः ॥ यथा नदीनदा लो
के सागरेनैकतां ययुः ॥३८॥ तद्वदात्माक्षरेनासौ निःकलेनैकतां व्रजेत् ॥ तस्माद्विज्ञानमेवास्ति न प्रपंचो न संस्थितिः ॥४
अज्ञानेनावृतं लोके विज्ञानं तेन मुह्यति ॥ तद्ज्ञानं निर्मलं शुद्धं निर्विकल्पं यदव्ययम् ॥४१॥ अज्ञानमिति तत्सर्वं विज्ञानमि
ति मे मतम् ॥ एतत्ते परमं सांख्यं भाषितं ज्ञानमुत्तमम् ॥४२॥ सर्ववेदांतसारं हि योगस्तत्रैकचित्तता ॥ योगात्संजायते ज्ञानं ज्ञा
नाद्योगः प्रवर्तते ॥४३॥ एकं सांख्यं च योगं च यः पश्यति स तत्ववित् ॥ अन्ये च योगिनो वत्स ऐश्वर्यासक्तचेतसः ॥४४॥ मज्जं
ति तत्र तत्रैव न त्वात्मैक्यमिति श्रुतिः ॥ एतत्सर्वगतं दिव्यमैश्वर्यमचलं महत् ॥४५॥ ज्ञानयोगाभियुक्तस्तु देहांते तदवाप्नुया
त् ॥ एष आत्माहमव्यक्तो मायावी परमेश्वरः ॥४५॥ सर्वतः पाणिपादोहमंतर्यामी सनातनः ॥ अपाणिपादो जवनो ग्रहीता हृदि
संस्थितः ॥४६॥ अचक्षुरपि पश्यामि तथा कर्णोपि शृणोम्यहम् ॥ वेदाहं सर्वमेवेदं न मां जानाति कश्चन ॥४७॥ प्राहुर्महांतं पुरुष

सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितं ॥६

षं मामेकं तत्त्वदर्शिनः ॥ पश्यंति ऋषयो हेतुमात्मानं सूक्ष्मदर्शितः ॥ निर्गुणामलरूपस्य यत्तदैश्वर्यमुत्तमम् ॥ यन्न देवा विजानंति मो
हिता मायया मम ॥ ४९ ॥ यन्मे गुह्यतमं देहं सर्वगं तत्त्वदर्शिनः ॥ प्रविष्टा मम सायुज्यं लभंते योगिनोऽव्ययम् ॥ ५० ॥ न येषां हि ममाप
न्ना माया वै विश्वरूपिणी ॥ ५१ ॥ लभंते परमं शुद्धं निर्वाणं ते मया सह ॥ ५२ ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ प्रसादान्मम
तो वत्स एतद्वेदानुशासनम् ॥ ५३ ॥ नापुत्रशिष्ययोगिभ्यो दातव्यं हनुमत्क्वचित् ॥ यदुक्तमेतद्विज्ञानं सांख्ययोगसमन्वितं ॥ ५४
इत्यार्षे श्रीमदद्भुतोत्तरकांडे सांख्ययोगो नाम एकादशः सर्गः ॥ ११ ॥ रामः पुनः प्रवचनमुवाच द्विजपुंगवम् ॥ अव्यक्तादभवत्कालः प्रधानं
पुरुषः परः ॥ १ ॥ तेभ्यः सर्वमिदं जातं तस्मात्सर्वमिदं जगत् ॥ सर्वतः पाणिपादांतं सर्वतोऽक्षिशिरोमुखम् ॥ सर्वाधारं निरानंदमव्यक्तं
द्वैतवर्जितम् ॥ सर्वोपमानैरहितं प्रमाणातीतगोचरं ॥ ४ ॥ निर्विकल्पं निराभासं सर्वाभासं परामृतम् ॥ अभिन्नं भिन्नसंस्थानं शाश्वतं ध्रु
वमव्ययम् ॥ ५ ॥ निर्गुणं परमं व्योम तज्ज्ञानं श्रुतयो विदुः ॥ स आत्मा सर्वभूतानां स बाह्याभ्यंतरः परः ॥ ६ ॥ सोऽहं सर्वत्रगः शांतो ज्ञाना
त्मा परमेश्वरः ॥ मया ततमिदं विश्वं जगदव्याकृतरूपिणा ॥ ७ ॥ मत्स्थानि सर्वभूतानि यस्तं वेद स वेदवित् ॥ प्रधानं पुरुषं चैव तद्वयं
समुदाहृतम् ॥ ८ ॥ तयोरनादिनिर्दिष्टः कालः संयमकः परः ॥ त्रयमेतदनाद्यंतमव्यक्ते समवस्थितम् ॥ ९ ॥ तदात्मकं तदन्यं स्यात्तद्रूपं मा

च

मकं विदुः ॥ महदाद्यविशेषांतं संप्रसूतेखिलं जगत् ॥ या सा प्रकृतिरुद्दिष्टा मोहिनी सर्वदेहिनाम् ॥ पुरुषः प्रकृतिस्थो हि भुंक्ते
प्रकृतिजान्गुणान् ॥११॥ अहंकारविकारित्वात्प्रोच्यते पंचविंशकः ॥ आद्यो विकारः प्रकृतिर्महानात्मेति कथ्यते ॥१२॥ विज्ञा
नशक्तिर्विज्ञानात्ह्यहंकारस्तदुत्थितः ॥ एक एव महानात्मा सोहंकारोभिधीयते ॥१३॥ स जीवः सोंतरात्मेति गीयते तत्त्व
चिंतकैः ॥ किंतु न वेदयत्सर्वं सुखं दुःखं च जन्मसु ॥१४॥ स विज्ञानात्मकस्तस्य मनः स्यादुपकारकम् ॥ तेनाविवेकत
स्तस्मात्संसारः पुरुषस्य तु ॥१५॥ स चाविवेकः प्रकृतौ संगात्कालेन सोभवेत् ॥ कालः सृजति भूतानि कालः संहरते
प्रजाः ॥ सर्वे कालस्य वशगा न कालः कस्यचिद्वशे ॥ सोंतरा सर्वमेवेदं नियच्छति सनातनः ॥१७॥ प्रोच्यते भगवान्प्राणः
सर्वज्ञः पुरुषोत्तमः ॥ सर्वेंद्रियेभ्यः परमं मन आहुर्मनीषिणः ॥१८॥ मनसश्चाप्यहंकारमहंकारान्महान्परः ॥ महतः परमव्यक्तं
अव्यक्तात्पुरुषः परः ॥१९॥ पुरुषाद्भगवान्प्राणस्तस्य सर्वमिदं जगत् ॥ प्राणात्परतरं व्योम व्योमातीतोग्निरीश्वरः ॥२०॥ सोहं
सर्वत्रगः शांतो ज्ञानात्मा परमेश्वरः ॥ नास्ति मत्तः परं भूतं मां विज्ञाय विमुच्यते ॥२१॥ नित्योहं नास्ति जगति भूतं स्थावरजंगमम् ॥
ऋते मामेकमव्यक्तं व्योमरूपं महेश्वरम् ॥२२॥ सोहं सृजामि सकलं संहरामि सदा जगत् ॥ मायी मायामयो देवः कालेन सह संगतः ॥२३

मत्संनिधाने नैवेषकाले करोति सकलं जगत्॥ नियोजयंत्यनंतात्मा ह्येतद्वेदानुशासनम्॥२४॥ इत्यार्षे रा॰ वा॰ श्री॰ अ॰ उपनि
षत्सु कथनं नाम सर्गः॥१२॥ वक्ष्ये समाहितमनाः शृणु षष्ठपवनात्मजा॥ येनेदं लभ्यते रूपं येनेदं संप्रवर्तते॥१॥ नाहं तपोभि
र्विविधैर्न दानेन न चेज्यया॥ शक्यो हि पुरुषैर्ज्ञातुमृते भक्तिमनुत्तमाम्॥२॥ अहं हि सर्वभूतानामंतस्तिष्ठामि सर्वतः॥ मां सर्व
साक्षिणं लोके न जानाति प्लवंगम॥३॥ यस्यांतरा सर्वमिदं यो हि सर्वांतरः परः॥ सोहं धाता विधाता च लोकेस्मिन् विश्वतोमु
खः॥४॥ न मां पश्यंति मुनयः सर्वे पि त्रिदिवौकसः॥ ब्रह्मा नो मुनयः शक्रो ये चान्ये प्रथितौजसः॥५॥ गृह्णंति सततं यत्नैर्योगि
नस्तत्परायणाः॥ यजंति विविधैरग्निं ब्राह्मणा वैदिकैर्मखैः॥६॥ सर्वलोकान् मस्यंति ब्रह्मा लोकपितामहः॥ ध्यायंति योगि
नो देवं भूताधिपतिमीश्वरम्॥७॥ अहं हि सर्वहविषां भोक्ता चैव फलप्रदः॥ सर्वदेवतनुर्भूत्वा सर्वात्मा सर्वसंस्तुतः॥८॥ मां
पश्यंति हि विद्वांसो धार्मिका वेदवादिनः॥ तेषां संनिहितो नित्यं ये भक्त्या मामुपासते॥९॥ तेषां ददामि तत्स्थानं आनंदं पर
मं परम्॥ अन्ये पि ये विकर्मस्थाः शूद्राद्या नीचजातयः॥१०॥ भक्तिमंतः प्रमुच्यंते कालेन मयि संगताः॥ न मद्भक्ता विनश्यंति
मद्भक्त्या वीतकल्मषाः॥११॥ आदौ चैतत्प्रतिज्ञातं न मे भक्तः प्रणश्यति॥ यो वा निंदति तं मूढो देवदेवं स निंदति॥१२॥ यो हि

१ ब्राह्मणाः क्षत्रिया वैश्या धार्मिका मामुपासते॥

तं पूजयेद्भक्त्या स पूजयति मां सदा ॥ पत्रं पुष्पं फलं तोयं मदाराधनकारणात् ॥ १३ ॥ यो मे ददाति नियतः स मे भक्तः प्रियो मतः ॥
अहं हि जगतामादौ ब्रह्माणं परमेष्ठिनम् ॥ १४ ॥ विधाय दत्तवान्वेदानशेषान्हंसनमम ॥ अहमेव हि सर्वेषां योगिनां गुरुरव्य
यः ॥ १५ ॥ धार्मिकाणां च गोप्ताहं निहंता सर्वविद्विषाम् ॥ अहं वै सर्वसंसारान्मोचको योगिनामिह ॥ १६ ॥ संसारहेतुको
हं च सर्वसंसारवर्जितः ॥ १७ ॥ अहमेव स संहर्ता स्रष्टाहं परिपालकः ॥ माया वै मामिका शक्तिर्माया लोकविमोहिनी ॥ १
८ ॥ ममैव च परा शक्तिर्या सा विद्येति कथ्यते ॥ नाशयामि तया मायां योगिनां हृदि संस्थितः ॥ १९ ॥ अहं हि सर्वशक्तीनां
प्रवर्तकनिवर्तकः ॥ आधारभूतः सर्वासां निधानममृतस्य च ॥ २० ॥ एका सर्वांतरा शक्तिः करोति विविधं जगत् ॥ आस्थाय ब्रह्म
णो रूपं मन्मयी मिह स्मृता ॥ २१ ॥ अन्या च शक्तिर्विपुला संस्थापयति मे जगत् ॥ भूत्वा नारायणोऽनंतो जगन्नाथो
जगन्मयः ॥ तृतीया महती शक्तिर्निहंति सकलं जगत् ॥ तामसी मे समाख्याता कालाख्या रुद्ररूपिणी ॥ २३ ॥ ध्याने
न मां प्रपश्यंति केचित् ज्ञानेन चापरे ॥ अपरे भक्तियोगेन कर्मयोगेन चापरे ॥ २४ ॥ सर्वेषामेव भक्तानां इष्टः प्रियतरो
मम ॥ यो हि ज्ञानेन मां नित्यं आराधयति नान्यथा ॥ २५ ॥ अन्ये च ये त्रयो भक्ता मदाराधनतत्पराः ॥ तेपि मां प्राप्नुवंत्येव

नन्विवर्तन्ति वै पुनः॥२६॥ मया ततमिदं सर्वमेतद्यो वेद सोऽमृतः॥ पश्याम्यशेषमेवेदं वर्तमानं स्वभावतः॥२७॥ करोति का
लो भगवान्महायोगेश्वरः स्वयम्॥ योगः प्रवक्ष्यते योगी मायाशास्त्रेषु सूरिभिः॥२८॥ योगेश्वरोऽसौ भगवान्महादेवो म
हाप्रभुः॥ महत्वात्सर्वतत्वानां परत्वात्परमेश्वरः॥२९॥ प्रोच्यते भगवान्ब्रह्मा महान्ब्रह्ममयो मतः॥ यो मामेवं विजानाति
महायोगीश्वरेश्वरः॥३०॥ सो विकल्पेन योगेन युज्यते नात्र संशयः॥ सोहं प्रेरयिता देवः परमानंदमाश्रितः॥ नित्या
मि योगी सततं यस्तं वेद स वेदवित्॥ इति गुह्यतमं ज्ञानं सर्ववेदेषु निश्चितम्॥३२॥ प्रसन्नचेतसे देयं धार्मिकाया
हिताग्नये॥ इत्यार्षे॰ वा॰ श्री॰ ब्र॰ भक्तियोगो नाम त्रयोदसस्सर्गः॥१३॥ सर्वलोकैकनिर्माता सर्वलोकैकरक्षिता॥
सर्वलोकैकसंहर्ता सर्वात्माहं सनातनः॥१॥ सर्वेषामेव वस्तूनामंतर्यामी पिता ह्यहम्॥ मध्ये चांतःस्थितं सर्वं नाहं
सर्वत्र संस्थितः॥२॥ भवता चाद्भुतं दृष्टं यत्स्वरूपं च मामकम्॥ मायेषामेह्यसौ वत्स मायया दर्शितं मया॥३॥ स
र्वेषामेव भावानामंतरे समवस्थितः॥ प्रेरयामि जगत्कृत्स्नं क्रियाशक्तिरियं मम॥४॥ ममेदं चेष्टते विश्वं मत्स्व
भावानुवर्ति च॥ सोहं कालो जगत्कृत्स्नं करोमिह नुमत्किं न॥५॥ तं हायेकरूपेण द्विधावस्था ममैव तु॥ आदि

बभा४

मध्यान्तनिर्मुक्तो मायातत्त्वप्रवर्तकः ॥ ६ ॥ क्षोभयामि च सर्गादौ प्रधानपुरुषावुभौ ॥ ताभ्यां संजायते सर्वं संयुक्ताभ्यां परस्परम् ॥ ७ ॥
महदादिक्रमेणैव मम तेजो विजृंभितम् ॥ यो हि सर्वजगत्साक्षी प्रवर्तक निवर्तकः ॥ ८ ॥ हिरण्यगर्भो मार्तण्डः सोऽपि मद्देहसंभ
वः ॥ तस्मै दिव्यं स्वमैश्वर्यं ज्ञानयोगं सनातनम् ॥ ९ ॥ दत्तवानात्मजान्वेदान्कल्पादौ चतुरः किल ॥ १० ॥ स मन्नियोगतो देवो ब्रह्मा
मद्भावितः ॥ ११ ॥ दिव्यं तन्मामकैश्वर्यं सर्वदा वहति स्वयम् ॥ स सर्वलोकनिर्माता मन्नियोगेन सर्ववित् ॥ १२ ॥ भूत्वा चतुर्मुखः सर्वं सृ
जत्येवात्मसंभवः ॥ योऽपि नारायणोऽनन्तो लोकानां प्रभवोऽव्ययः ॥ १३ ॥ ममैव परमा मूर्तिः करोति परिपालनम् ॥ योऽन्तकः सर्वभूता
नां रुद्रः कालात्मकः प्रभुः ॥ १४ ॥ मदाज्ञयासौ सततं संहरत्येव मे तनुः ॥ हव्यं वहति देवानां कव्यं हि पितॄणामपि ॥ १५ ॥ पाकं च कुरुते
वह्निः सोऽपि मच्छक्तिचोदितः ॥ भुक्तमाहारजातं यत्पचते तदहर्निशम् ॥ १६ ॥ वैश्वानरोऽग्निर्भगवानीश्वरस्य नियोगतः ॥ योऽपि स
र्वाम्भसां योनिर्वरुणो देवपुंगवः ॥ सो जीवयत् जगत्कृत्स्नमीशस्यैव नियोगतः ॥ सोऽन्तस्तिष्ठति भूतानां वह्निर्देवो निरंजनः ॥ १७ ॥
मदाज्ञयासौ भूतानां शरीराणि बिभर्ति हि ॥ योऽपि संजीवनो नृणां देवानाममृताकरः ॥ सोमः स मन्नियोगेन चोदितः कालवर्तकः ॥
स्वभासा च जगत्कृत्स्नं प्रकाशयति सर्वदा ॥ १९ ॥ सूर्यो रश्मिं वितनुते शास्त्रेणैव स्वयंभुवः ॥ योऽप्यशेषजगच्छास्ता शक्रः सर्वामरेश्वरः ॥
यज्वानां फलदो देवो वर्तते सो मदाज्ञया ॥ यः प्रशास्ता ह्यसाधूनां वर्तते नियमादिह ॥ २० ॥ यमो वैवस्वतो देवो देवदेवनियोगतः ॥ यो हि सर्वधना

ध्यक्षो धनानां संप्रदायकः ॥२२॥ सोपीश्वरनियोगेन कुवेरो वर्त्तते सदा ॥ यः सर्वरक्षसां नाथस्तापसानां फलप्रदः ॥२३॥ मन्नि
योगात् सो देवो वर्त्तते नैर्ऋतिः सदा ॥ वेतालगणभूतानां स्वामी भोगफलप्रदः ॥२४॥ ईशानः कोपि भक्तानां सोपि तिष्ठत्
न मामाज्ञया ॥ यो वामदेवो गिरिशः शिष्यो रुद्रगणाग्रणीः ॥२५॥ रक्षको योगिनां नित्यं वर्त्तते सौ ममाज्ञया ॥ यश्च सर्वजगत्पू
ज्यो वर्त्तते विघ्ननाशकः ॥२६॥ विनायको धर्मनेता सोपि मद्वचनात् किल ॥ यो हि ब्रह्मविदां श्रेष्ठो देवसेनापतिः प्रभुः ॥२७॥
स्कंधो सौ वर्त्तते नित्यं स्वयंभूरिति चोदितः ॥ ये च प्रजानां पतयो मरीच्याद्या महर्षयः ॥२८॥ सृजंति विविधं लोकं परस्यैव नि
योगतः ॥ या च श्रीः सर्वभूतानां ददाति विपुलां श्रियम् ॥२९॥ पत्नी नारायणस्यासौ वर्त्तते मदनुग्रहात् ॥ वाचं ददाति वि
पुलां या च देवी सरस्वती ॥३०॥ सापीश्वरनियोगेन चोदिता संप्रवर्त्तते ॥ याशेषपुरुषान् घोरान्नरकात्तारयन्य
पि ॥३१॥ सावित्री संस्मृता देवी देवाज्ञानुविधायिनी ॥ पार्वती परमा देवी ब्रह्मविद्याप्रदायिनी ॥३२॥ यो पि ध्याता वि
शेषणं सोपि मद्वचनान्नृणाम् ॥ यो नंतो महिमानंतः शेषोशेषामरप्रभुः ॥३३॥ दधाति शिरसा लोकं सोपि देवनियोगतः ॥
यो ग्निः संवर्त्तको नित्यं वडवारूपसंस्थितः ॥३४॥ पिबत्यखिलमत्राब्धिमीश्वरस्य नियोगतः ॥ ये चतुर्दश लोके स्मि

गी॰ ६

त्समनवः प्रथितौजसः ॥३५॥ पालयंति प्रजाः सर्वास्ते पितस्य नियोगतः ॥ आदित्या वसवो रुद्रा मरुतश्च तथाश्विनौ ॥३६॥
अन्याश्च देवताः सर्वा मच्छासनमधिष्ठिताः ॥ गंधर्वा गरुडा यक्षाः सिद्धाः साध्याश्च चारणाः ॥३७॥ यक्षरक्षाः पिशाचाः
श्च स्थिताः शास्त्रे स्वयंभुवः ॥ कला काष्ठा निमेषाश्च मुहूर्ता दिवसाः क्षणाः ॥३८॥ ऋत्वब्दमासपक्षाश्च स्थिताः शा
स्त्रे प्रजापतेः ॥ युगा मन्वंतराण्येव मम तिष्ठंति शासने ॥३९॥ पराश्चैव परार्द्धाश्च कालभेदास्तथापरे ॥ चतुर्विधानि भूतानि
स्थावराणि चराणि च ॥४०॥ नियोगादेव वर्तंते सर्वाण्येव स्वयंभुवः ॥ अतीतानि असंख्यानि ब्रह्मांडानि मदाज्ञया ॥४१॥ प्र
वृत्तानि पदार्थौघैः सहितानि समंततः ॥ ब्रह्मांडानि भविष्यंति बहुवस्तुभिरात्मकैः ॥४२॥ तथैव संहरिष्यंति मदाज्ञाः परमात्म
नः ॥ भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ॥४३॥ भूतादिरादिप्रकृतिर्नियोगान्मम वर्तते ॥ पाशेषसर्वजगतां मोहिनी सर्व
देहिनाम् ॥४४॥ माया विवर्तते नित्यं सापीश्वरनियोगतः ॥ विधूय मोहकलिलं यया पश्यति तत्पदम् ॥४५॥ सा पि वि
द्या महेशस्य नियोगाद्वशवर्तिनी ॥ बहुनात्र किमुक्तेन मम शक्त्यात्मकं जगत् ॥४६॥ मयैव पूर्यते कृत्स्नं मय्येव प्रलयं व्रजेत्
॥ अहं हि भगवानीशः स्वयंज्योतिः सनातनः ॥ परमात्मा परं ब्रह्म मत्तो ह्यन्यन्न विद्यते ॥ इत्येतत्परमं ज्ञानं भवते कथितं मया ॥४७॥
ज्ञात्वा विमुच्यते जंतुर्जन्मसंसारबंधनात् ॥ मायामाश्रित्य जातोहं गेहे दशरथस्य हि ॥४८॥ रामोहं लक्ष्मणो ह्येष शत्रुघ्नो भरतोपि च ॥ चतु

५४

श्री·रा·॥२४॥

र्षिसंप्रभूतोहं कथितं तेनिः नात्मज ॥५०॥ मयास्वरूपं च तनवकथितं हरिपुंगव ॥ रूपयान हृदा धार्यं न विस्मर्तव्यमेव हि ॥५१॥
येनेदं पठ्यते नित्यं संवादो भवता मम ॥ जीवन्मुक्तो भवेत्सोपि सर्वपापैः प्रमुच्यते ॥५२॥ श्रावयेद्वा द्विजान्शुद्धान्ब्रह्मचर्यपराय
णान् ॥ यो वा विचारयेदर्थं स याति परमां गतिम् ॥५३॥ यश्चैतच्छृणुयान्नित्यं भक्तियुक्तो दृढव्रतः ॥ सर्वपापविनिर्मुक्तो ब्रह्मलो
के महीयते ॥५४॥ तस्मात्सर्वप्रयत्नेन पठितव्यं मनीषिभिः ॥ इत्यार्षे॰रा॰वा॰म॰ भगवद्धनुसंवादे चतुर्दशः सर्गः ॥१४॥ ध्यात्वा हृदि
स्थं प्रणिपत्य मूर्ध्ना बद्धांजलिर्वायुसुतो महात्मा ॥ ॐकारमुच्चार्य विलोक्य देवं अंतःशरीरे निहितं गुहायाम् ॥१॥ रामं परात्मानम
कुंठशक्तिं स्वानंदयुक्तो मुखमश्रुजातैः ॥ तुष्टाव तं ब्रह्ममयैर्वचोभिरानंदपूर्णायतमानसः स ॥२॥ त्वामेकमीशं पुरुषं पुराणं प्रा
णेश्वरं राममनंतयोगम् ॥ नमामि सर्वांतरसन्निविष्टं प्रचेतसं ब्रह्ममयं पवित्रम् ॥३॥ त्वां पश्यंति मुनयो ब्रह्मयोनिं दांताः शांता
ः विमत्सरं प्रर्कवराम् ॥ ध्यात्वात्मस्थाऽसंगं स्वे शरीरे कविं परेभ्यः परमं तत्परं च ॥४॥ त्वत्तः प्रसूता जगतः प्रसूतिः सर्वात्मभूस्त्वं पर
मात्मभूतः ॥ अणोरणीयान्महतो महीयान्त्वामेव सर्वं प्रवदंति संतः ॥५॥ हिरण्यगर्भो जगदंतरात्मा त्वत्तोधिजातः पुरुषः
पुराणः ॥ संजायमानो भवता विसृष्टो यथाविधानं सकलं ससर्ज ॥६॥ त्वत्तो वेदाः सकलाः संप्रसूतास्त्वय्येवांते संस्थितिं ते ल

॥२५

मंत्रे॥ पश्यामि त्वां जगतो हेतुभूतं न चैव सर्वं हृदये संनिविष्टं॥७॥ त्वय्येवेदं स्थाप्यते ब्रह्मचक्रं मायाबीजं जगतामेकनाथः॥ नमामि त्वां श
रणं संप्रपद्ये॥८॥ योगात्मानं चित्पदी दिव्यनित्यम् पश्यामि त्वां परमाकाशमध्ये॥ नृत्यंतेनेमहिमानं स्मरामि सर्वात्मानं बहुधा संनि
विष्टम्॥९॥ ब्रह्मानंदमनुभूपानुभूयं ओंकारस्ते वाचको मुक्तिबीजम्॥ त्वमक्षरो प्रकृतो गूढरूपं तत्त्वां सत्यं प्रवदंतीह संतः॥१०॥
स्वयंप्रभं भवतो यत्प्रकाशं स्तुवंति त्वां सततं सर्वदेवाः॥ नमंति त्वां ऋषयः क्षीणदोषाः शांतात्मानः सत्यसंधं वरिष्ठम्॥११॥ विशंति
त्वां यतयो ब्रह्मनिष्ठाः॥ एको वेदो बहुशाखो ह्यनंतस्त्वामेवैकं बोधयत्येकरूपम्॥१२॥ तं वेद्यं त्वां शरणं ये प्रपन्नास्तेषां शांतिः शाश्व
ती नेतरेषाम्॥ भवानीशो नादिमांस्तेजोराशिर्ब्रह्मा विश्वं परमेष्ठी वरिष्ठः॥१३॥ आत्मानंदं चानुभूयानुशेते स्वयंज्योतिर्वचको
नित्यमुक्तः॥ एको देवस्त्वं करोषीह विश्वं त्वं पालयस्यखिलं विश्वरूपः॥१४॥ त्वामेव [illegible] नियं विंदतीदं नमामि त्वां शरणं त्वां प्रप
न्नः॥ त्वामेकमाहुः परमं च रामं प्राणं बृहंतं हरिमग्निमीशम्॥१५॥ इंद्रं मृत्युमनिलं चेकितानं धातारमादित्यमनेकरूपम्॥ त्वमक्ष
रं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्॥१६॥ त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषोत्तमोसि॥ त्वमेव विष्णुश्च
तुराननस्त्वं त्वमेव रुद्रो भगवानपीशः॥१७॥ त्वं विश्वनाभिः प्रकृतिः प्रतिष्ठा सर्वेश्वरस्त्वं परमेश्वरोसि॥ त्वामेकमाहुः पुरुषं पुराणमा
दित्यवर्णं तमसः परस्तात्॥१८॥ चिन्मात्र. [illegible]मचिंत्यरूपं ब्रह्मैव शून्यं प्रकृतिं निर्गुणं च॥ यदंते सर्वमिदं विभाति यदव्ययं नि

मलमेकरूपम्॥१९॥किमप्यचिंत्यं तव रूपमेतत्तदंतरे यत्प्रतिभाति तत्त्वम्॥योगेश्वरं रूपमनंतशक्तिं परापरां ब्रह्मतनुं पवित्र
म्॥२०॥नमामि सर्वेश शरण्यार्थिन स्त्वां प्रसीद भूताधिपते प्रसीद॥त्वत्पादपद्मस्मरणादशेषं संसारबीजं विलयं प्रयाति॥२१॥
मनो नियम्य प्रणिधाय कायं प्रसादयाम्येक रसं भवंतम्॥नमोस्तु रामाय भवोद्भवाय कालाय सर्वैकहराय तुभ्यम्॥२२॥न
मोस्तु रामाय कपर्दिने ते नमोग्नये दर्शय रूपमग्र्यम्॥सतस्य तत्त्वमाकर्ण्य वायुपुत्रस्य धीमतः॥प्राह गंभीरया वाचा हनूमंतं रघू
त्तमः॥२४॥स्तोष्यंति ये वै स्तुत्यानेयास्यंति परमां गतिम्॥स्थिरो भव हनूमंस्त्वं कार्यमोपयिकं कुरु॥२५॥इत्यार्षे रा॰ वा॰ अ॰ हनु
मत्कृतस्तवराजो नाम पंचदशः सर्गः॥१५॥रामः प्रहस्याह पुनर्हनुमंतं महाद्युतिः॥रक्षसा मे हृता भार्या रावणेन दुरात्मना॥१॥
सुग्रीवेण समं सख्यं कारयाद्य प्लवंगम॥हसित्वा मधुरं वीरो हनुमान्प्राब्रवीद्वचः॥२॥तव भार्या महाभागा रावणेन हृता यदि
विश्वं यथेदमाभाति तथेदं प्रतिभाति मे॥३॥तथापि प्रभुणादिष्टं कार्यमेव हि किं करै॥आरोप्य स्कंधयोर्वीरौ सुग्रीवांतिक
मानयत्॥४॥नोदृष्ट्वा पुरुषव्याघ्रौ सुग्रीवो वानरोत्तमः॥वालिनं तं जितं मेने प्राप्तामेने हृतं स्त्रियम्॥५॥सख्यं च कार रामेणादि
स्याद्दिस्येति चाब्रवीत्॥वालिनं विनियंकृत्वा राज्यं चास्मै निवेद्य च॥६॥नानादेशान्वानरांश्च प्रस्थानीय रघूत्तमः॥हनुमंतं नद

रुद्धौ भ्रातरौ रामलक्ष्मणौ ॥७॥ सिंधोस्तटं ततो यातः सुग्रीवेण सह प्रभुः ॥ पारे समुद्रं लंकां च निरूप्य रघूत्तमः ॥८॥ वानरा हि यथा यां
ति लंकां लक्ष्मणात कुरु ॥ रामस्य वचनं श्रुत्वा समुद्रं प्राह लक्ष्मणः ॥९॥ सिंधो त्वं स्तंभयात्मानं यथा यास्यंति वानराः ॥ सिंधुस्तत्प्रभु
णादिष्टं न शुश्राव यदा तदा ॥१०॥ लक्ष्मणः क्रोधसंदीप्तः पपाताब्धेर्जलांतरे ॥ तद्देहवह्निशिखया शुशोष जलमब्धेर्जलम् ॥११॥
पातालं सिस्थलं भांति स्युर्देवा भीता दिशो दश ॥ तं दृष्ट्वा महदाश्चर्यं वानरा विस्मयं गताः ॥१२॥ हाहाकारं प्रकुर्वन्ते लोकाः सर्वे चरा
चराः ॥ ऋषयो मूतसर्वाश्च स्वस्ति स्वस्तीति चाब्रुवन् ॥१३॥ रामो लक्ष्मणं प्राह नैनं युक्तं त्वया कृतम् ॥ उनरेनं शूरयामितीताचि
रहजेनवै ॥ श्रशुरोति प्रतिज्ञाय तं तथा शूरयत्प्रभुः ॥१४॥ रामोपरि तदाकाशात् पुष्पवृष्टिः पपात ह ॥ लोकाश्च सुस्थिरा त्यामस
र्चिंतयित्वा पुनः प्रभुः ॥१५॥ सिंधुनां तंतुतो रामः सेतुं सिंधौ बबंध च ॥ लंकायां रावणं हत्वा राक्षसान्मधुसूदनः ॥१६॥ आरोप्य पुष्पके
सीतां विभीषणसहायवान् ॥ अयोध्यामगमद्रामो सुग्रीवहनुमादिभिः ॥१७॥ आनंदैर्योजयामास भ्रातॄन्मातॄश्च बांधवान् ॥ राजा स
र्वस्य लोकस्य प्रजानामनुरंजनः ॥१८॥ रामं राजानमासाद्य तिर्यंचो विषयं मुदम् ॥ देवदुंदुभयो नेदुः सर्वदा हि नभस्तले ॥१९॥ ववर्ष
जलदाकाशे पुष्पवृष्टिः पपात खात् ॥ इत्यार्षे रा॰ वा॰ आ॰ रामराज्योपलंभनं नाम षोडशः सर्गः ॥१६॥ प्राप्तराज्यस्य रामस्य राक्षसा
नां क्षये कृते ॥ आजग्मुर्मुनयस्तत्र राघवं प्रतिनंदितुम् ॥१॥ विश्वामित्रो यवक्रीतो रैभ्यः कण्वोऽथ वसवश्च ॥ कवषश्च मुनिः शार्दूलो ये

ऋषा॰

पूर्वां दिशमाश्रिताः ॥२॥ स्वस्त्यात्रेयश्च नमुचिर्विरिमयोगस्त्यश्च वचा॥ आजग्मुर्मुनयस्तत्र अवाचीं ये ऽश्रिता दिशम् ॥३॥ उषङ्गुः कमठो धूम्रः
रौद्रास्यो मुनिपुंगवः ॥ आजग्मुर्मुनयस्तत्र प्रतीचीं ये श्रिता दिशम् ॥ ■ ॥४॥ शिष्योपशिष्यसहिता वसिष्ठप्रमुखर्षयः ॥ प्राप्ते तु महात्मानो
राघवं निवेशनम् ॥ गृहीत्वा फलमूलानि हुताशसमविग्रहाः ॥५॥ एवं प्रतिनंद्याथ विविशुः परमासने ॥६॥ एवश्च महातेजाः सीतया
सहसुव्रतः ॥ भ्रातृभिर्मंत्रिभिः सार्द्धं पौरैः श्रेणीमुखैस्तथा ॥७॥ विनीत उपसंगम्य पूजयामास तान्मुनीन् ॥ अगस्त्यप्रमुखा विप्राद
ष्ट्वा दिष्ट्येति चाब्रुवन् ॥८॥ राम एवं प्रशंसंतो मुनयो नाम्विदांवराः ॥ त्वं हि देवो जगन्नाथो जगतामुपकारकः ॥९॥ रावणस्य सामात्य
स्यसपुत्रस्य वधात्प्रभो ॥ जगदेव महाबाहो उनर्जीतमिवाभवत् ॥१०॥ नरावरणादभ्युधिको दुष्टो लोकक्षयंकरः ॥ दशास्ये दशदिक्कार्य
मास्तापयति राक्षसः ॥११॥ स दशास्यो हतो राम दिष्ट्या च जगदुद्धृतम् ॥ भवानसि भूपा॰ ब्रह्मणा प्रार्थितः स्वयम् ॥१२॥ पुंडरीकविशा
लाक्षः श्यामः आजानुबाहुकः ॥ अयोध्यायां प्रादुरभूद्दिष्ट्या ककु॰नंदनः ॥१३॥ त्वद्दर्शनान्महाबाहो निर्वृताः स्मो वयं प्रभो ॥ न देवस्म
र्यमारांसु चितमुत्तवाहयेद्धिनः ॥१४॥ एवमुक्ते तु मुनिभिः सानुक्रोशं पुनः पुनः ॥ जहास मधुरं साध्वी सीता जनकनंदिनी ॥१५॥ उवाच सु
स्मितं देवी मुनीनां मितभाषिणी ॥ मुनयो पदब्रुवन्युक्तं रावणस्य वधं प्रति ॥१६॥ परिहासइवाभाति प्रशंसनमिदं द्विजाः ॥ रावणो
हि दुराचारो सत्यमेतन्न संशयः ॥१७॥ दशभिर्वदनैर्वीरो जगदुद्वेजको हि सः ॥ दशास्यस्य वधो विप्रा न प्रशस्तामितार्हसि ॥१८॥ एत

53

श्रुत्वा तु मुनयो विस्मयं परमं गतास्तथा॥ किमेतदिति हो चुस्ते परस्परमुखेक्षिणः॥१९॥ अयोनिसंभवा सीता काकुत्स्थकुलमाश्रिता।
अस्मानपि जहासेयं किमेतन्नाव विद्महे॥२०॥ तच्छ्रुत्वा वचनं तेषां मुनीनां भावितात्मनाम्॥ सीता प्रश्नं प्रणम्योचे कृतां-
जलिपुटा सती॥२१॥ पृथग्जनेव मुनयो नाहमनृतभाषिणी॥ यदि चाज्ञापयथ मां तदा वक्ष्यामि चादितः॥२२॥ अ-
गस्त्यप्रमुखा विप्राः सीतायाः विनयान्वितम्॥ आकर्ण्य वचनं प्रीताः प्रोचुस्ते कथ्यतामिति॥२३॥ ततः सीता महाभा-
गा प्रवक्तुमुपचक्रमे॥ प्रति मुनीन्द्रवरांश्च मंत्रिणः श्रेष्ठमुख्यकान्॥२४॥ विनयेनाभ्यनुज्ञाप्य पूर्ववृत्तांतमादरात्॥
पूर्वं विवाहान्मुनयो यदाहं पितृमंदिरे॥२५॥ तदैको तिथिरूपेण ब्राह्मणः समुपागतः॥ आगत्य पितरं मे स समुवाच द्विज-
सत्तमः॥२६॥ चतुरो वार्षिकान्मासान्स्थास्यामि तव मंदिरे॥ यदि सेवापरोसि त्वं भवस्यमरसंनिभ॥२७॥ जनको मत्
पिता विप्रं द्विजभक्तिपरायणः॥ ब्राह्मणं वासयामास नानाभक्ष्यं समादिशत्॥२८॥ अहं च तस्य सेवायै नियुक्ता धर्मभीरु-
णा॥ यदा तथाज्ञापयति द्विजः स परमार्थवित्॥२९॥ तथाहं करवं तस्य रात्रिंदिवमतंद्रिता॥ नानातीर्थाभिगमनं कृतं तेन म-
हात्मना॥३०॥ तत्रोपेत्य कथांश्चित्राः श्रावयामास मां द्विजः॥ सेवया मम धैर्येण चानुकूल्येन तर्पितः॥३२॥ कदाचिद्ब्राह्मणा-
श्रेष्ठः प्रियभाषी यदा तथा माम्॥ तद्दोहमभिधास्यामि शृणुत द्विजपुंगवाः॥३३॥ एकदा प्रातरुत्थाय कृतमंत्रं कृतान्हि-

कः॥सीतेइतिसमामाध्यप्रवक्तुमुपचक्रमे॥३४॥शृणुसीतेमयादृष्टमाश्चर्यैकस्थानने॥दधिमंडोदकाब्धेर्यःपरःस्वादूद
कोधिकः॥३५॥उष्करद्वीपमासाद्यवर्त्तिनेवलयाकृतिः॥पुष्करेउष्करंदृष्टंमहावन्हिशिखोज्वलम्॥३६॥यत्रायुतायुतञ्चै
वब्रह्मणःपरमासनम्॥तत्द्वीपवर्षयोर्मध्येमानसोत्तरसंज्ञकः॥मर्यादापर्वतोदैर्घ्येयापामेयुतयोजनः॥तच्छृंगेतस्य
चतुर्दिक्षुइंद्रादीनांपुराणिहि॥३८॥क्रीडार्थंनिर्मितान्येषांमहांतिविश्वकर्मणा॥सुमालीराक्षसश्रेष्ठोकेकसीना
मतत्सुता॥३९॥मुनेर्विश्रवसःपत्नीसाऽसूतरावणाह्वयम्॥एकसहस्त्रवदनोद्वितीयोदशवक्त्रकः॥४०॥जन्मकालेसु
रैरुक्तंजातावैरावणाह्वयम्॥लोकानांरावणाज्जातंनामयोगिकमेतयोः॥४१॥कनिष्ठोदशकंठोयःशितिकंठप्रसादकः॥
लंकामधिवसत्येषधनदेनक्षितिर्निर्मिताम्॥४१॥ब्रह्मणोवरदानेनत्रिलोकीमवमन्यते॥श्रेष्ठःसहस्त्रवदनोरावणोलो
करावणः॥४२॥स्वाभाविकबलेनासौउष्करद्वीपमाश्रितः॥सूर्याचंद्रमसोयस्यक्रीडेत्कंदुकलीलया॥४३॥कु
लाचलान्समुद्रान्यःकंदुकंक्रीडितेहिसः॥मानसोत्तरशैलेतस्यचतुर्दिक्षुपुराणिहि॥४४॥आच्छिद्यसंगृहीतानिदिग्गीनां
महात्मनाम्॥तत्रैवरमतेराजामातानामहकुलैःसह॥४५॥तत्रैद्वीपपुराण्यासेसस्वयंतत्रतिष्ठति॥अन्यान्यन्येभ्यएवा

दानमंत्रिभ्यो राक्षसाधिपः ॥ विशेषतो ऽलंकृता सा पुरी परबलादिना ॥ जगतां सारमाकृष्य यथा संस्थानमंडिता ॥४७॥ चं
पकाशोक मंदार कदली प्रियकार्जुनैः ॥ पाटलाशोक जंबूभिः कोविदारैश्च चंपकैः ॥४८॥ पनसैः शालतालैश्च तमालै
र्देवदारुभिः ॥ बकुलैः पारिजातैश्च कल्पवृक्षैरलंकृता ॥४९॥ अन्यैश्च विविधैर्वृक्षैः सर्वर्तुकुसुमोज्वलैः ॥ दिव्यगंध
रसैर्दिव्यैः सर्वर्तुफलसंयुतैः ॥५०॥ भ्रमरैः कोकिलैर्नानावर्णपक्षिभिरुज्वला ॥ शातकौंभमयैः केश्चित्ज्वलदग्निशिखो
पमैः ॥ नीलांजननिभैश्चान्यैः शोभिता वरपादपैः ॥ दीर्घिकासंतिबहवो जलपूर्णा मनोदयाः ॥५२॥ महार्हमणिसोपानाः
स्फटिकोत्तरकुट्टिमाः ॥ फुल्लत्पद्मोत्पलवतीश्चक्रवाकादिशोभिताः ॥५३॥ दात्यूहगणसंघुष्टा हंससारसनादिताः ॥
तत्र तत्र वने देशाः वैडूर्यमणिसंनिभाः ॥५४॥ शाड्वलैः परमोपेताः सुखार्थमुपकल्पिताः ॥ सर्वर्तुसुखसंपन्नाः पुंस्कोकि
लकूजावराः ॥५५॥ ये वृक्षा नंदने तिष्ठन्ये च चैत्ररथे स्थिताः ॥ मंदिरेष्वेषु शैलेषु ये वृक्षास्तत्र संस्थिताः ॥५६॥ नाना
मणिमयी भूमिर्मुक्ताजालमयी तथा ॥ विचित्र बद्ध सोपाना प्रासादैरुपशोभिता ॥५७॥ पुरद्वारसमाकीर्णा पुरी परम
शोभना ॥ न देवैरनुभूयेत स्वर्गिभिर्नानुभूयते ॥५८॥ तत्पुरीं स्थितिसंप्राप्य न पंकुर्वंति सत्तमाः ॥ तस्यां सहस्रवदनो
नवगो राक्षसाधिपः ॥५९॥ भ्राति जगद्वशी कृत्य हेलया बाहुलीलया ॥ इंद्रादीन् त्रिदशान्सर्वान् रणे बध्वा सकिंनरान् ॥६०॥

अ०रा० २८॥

गंधर्वान्दानवान्भीमान्नागान्विद्याधरांस्तथा॥ बा० ५ क्रीडनया क्रीडन्मेरुं मन्ये तमर्षभम्॥ ६८॥ स यदा सर्वलोकानां त्रासनं त
मुरेभर॥ तदा पितामहोऽन्ये त्य पुलस्त्यो विश्रवास्तथा॥ ६२॥ न्यवारयन्नृपत्नतः ते गतवन्तो निभापकाः॥ एवं स रावणो
देवि सहस्रवदनो महान्॥ ६३॥ पुष्करद्वीपमासाद्य वर्त्तते जनकात्मजे॥ तस्यानुजो दशास्यो यं लंकायां जानकि
स्थितः॥ ६४॥ चित्राराणीत्यादीनि मे शंसयित्वा विश्रोमासांश्चतुरो पापयित्वा॥ राजानं मां चाशिषां योजयि
त्वा जगामैष प्रोषितस्तीर्थयात्राम्॥ ६५॥ इत्यार्षे रा० वा० आ० अ० सहस्रवदनोत्पत्तिर्नाम सप्तदशः सर्गः॥ १७॥ श्री
सीतोवाच॥ एवं स रावणो विप्राः सहस्रवदनो महान्॥ प्रोषितेन द्विजेनाहं श्रुत्वाश्चर्यं च विस्मिता॥ १॥ अद्यापि
तन्मम हृदि जागरूकं हि वर्त्तते॥ पत्यामे बाहुवीर्येण दशास्यो रावणो हतः॥ २॥ सानुगः ससुतामात्यः सभ्रातृकः सबां
धवः॥ मत्कृते च पुरी लंकास्थिता मध्ये महोदधौ॥ ३॥ सुग्रीवेण सहायेन तथा हनुमदादिभिः॥ इदं लोकोत्तरं कर्म
कृतं लोकहितं महत्॥ ४॥ तथापि हृदि मे नैतदाश्चर्यं प्रतिभाति हि॥ यदि तस्य वधं कुर्याद्रावणस्य दुरात्मनः॥ ५॥ तदा
संभाव्यते कीर्त्तिर्जगत्स्वास्थ्यमवाप्नुयात्॥ अतो मे हसितं विप्राः क्षमध्वं च लनोपमाः॥ ६॥ आकर्ण्य मुनयः सर्वे साधु

॥

57

साध्विति वादिनः ॥ जानकीं प्रशशंसुस्ते सर्वे लोकहितैषिणीम् ॥ ७ ॥ राघवो वचनं श्रुत्वा सीताया वीर्यवर्द्धनम् ॥ सिंहनादं विनद्यो

च्चैः सर्वानाज्ञापयत्प्रभुः ॥ ८ ॥ सुनयोद्दैव गंतव्यं रावणस्य जयाय वै ॥ लक्ष्मणं भरतं चैव शत्रुघ्नं चादिशत्प्रभुः ॥ ९ ॥ मित्रं सुग्रीव हनुम

न्सर्वे जांबवदादयः ॥ गच्छामः सहितास्तत्र सैनिकैः सह मंत्रिभिः ॥ १० ॥ इत्याज्ञाप्य महाबाहुः सस्मार पुष्पकं रथम् ॥ स्मरणादागतस्तत्र पु

ष्पको रथुत्तमः ॥ ११ ॥ तत्रारुह्य महावीर्यो रामचंद्रः पुरोगमः ॥ भरतो लक्ष्मणश्चैव शत्रुघ्नश्चामितद्युतिः ॥ १२ ॥ सुग्रीव प्रमुखाः

सर्वेवानंजितकाशिनः ॥ विभीषणो महाबाहुः सैरक्षोगणैः प्रभुः ॥ १३ ॥ मात्रादींश्च नमस्कृत्य सर्व एव विनिर्ययुः ॥ सीता

पि रामकार्यार्थं निर्ययौ राघवाज्ञया ॥ १४ ॥ सुमंत्राद्यामंत्रिणश्च सैनिकास्ते च निर्ययुः ॥ नानाशस्त्रप्रहरणा नानायुध

कलापिनः ॥ प्रचुक्रुशुस्ते सिंहनादं महाघोरं महाबलाः ॥ धनुःशब्देन रामस्य सिंहनादेन चैव हि ॥ १६ ॥ चचाल वसुधा शैलाश्चेलुः पेतुर्ग्र

हाश्च खात् ॥ नद्यो शुष्यन्त समुद्राश्च समुद्वेलाश्चकंपिरे ॥ १७ ॥ सुग्रीवो हनुमान्नीलो जांबवान्नल एव च ॥ प्रसंनो हरयः सर्वे

निर्ययू रामशासनात् ॥ १८ ॥ सतयासीतयासार्द्धं रामचंद्रो महाबलः ॥ कामगं पुष्पगं दिव्यमारुरोह धनुर्द्धरः ॥ १९ ॥ पुष्पकं ते

समारुहन्सर्व एव महाबलाः ॥ प्रोत्साहयंतो वचनैर्निर्ययुर्जितकाशिनः ॥ २० ॥ रामाज्ञया पुष्पकं तदाकाशपथमाश्रितम् ॥ म

नोमारुतवेगेन विपक्षो गरुडो यथा ॥ २१ ॥ जगाम पुष्करद्वीपं यत्रास्ति मानसोतरः ॥ मानसोतरमासाद्य विस्मितास्ते महाबलाः ॥ किं

६५

अ·रा·२६॥

चित्रं किमिति प्रोचुर्दिग्यमाश्चर्यलक्षणाम्॥ ताबवोभ्रान्तमिः सार्द्धंसह वानरपुंगवैः॥२३॥ सिंहनादं विनद्योच्चै धनुश्चास्पिन्यकर्षयत्॥ स
शब्दस्तुमुलोभूत्सापृथिवीचांतरिक्षगः॥२४॥ पातालविवरांश्चैव पूरयामास सर्वतः॥ रावणाः सहस्रोतस्यो किमेतदितिसंवदन्॥
२५॥ ततस्त्याराक्षसाः क्रुद्धाः सर्वएव विनिर्ययुः॥ अहोकुतश्चित्स्वरोयं साधुसर्वेनिरूप्यताम्॥२६॥ इत्याभाष्यराक्षसेंद्रो रासेंद्रै
र्महाबलैः॥ नगरान्निर्ययौशीघ्रं संदष्टो ष्टपुटोबली॥२७॥ द्वादशादित्यसंकाशः सहस्रवदनोमहान्॥ द्विसहस्रभुजोद्रिको
द्विसहस्रविलोचनः॥२८॥ महामेघसमाध्वानो वडवाग्निसमः क्रुधा॥ शतयोजनविस्तीर्णोरथे सर्वसमन्विते॥२९॥ नानायुधा
निसंगृह्य परिघप्रासतोमरान्॥ भुशुंडीः परश्वधं खंगान्लोहमुद्गरचक्रकान्॥३०॥ पाशांश्च विविधान्गृह्य बाणान्कर्मारमा
र्जितान्॥ विपाठान्क्षुरधारांश्च अर्द्धचंद्रान्स्तनीनपि॥३१॥ नानायुधसहस्राणि नानाविधधनूंषि च॥ प्रगृह्य सहस्रप्रायात
पत्रराम्मोधनुर्द्धरः॥३२॥ सिंहनादं समपुरेरिपुर्यावद्विसजेह॥ ममापिरिपुरस्ती तिदुर्धर्षः समुगतम्॥३३॥ इंद्राद्याः ककुभां ना
थामत्याः प्राणपरी[illegible]या॥ पातालविवरैः स्वर्गस्थर्गैः पातालमेककम्॥३४॥ करोमिसहसैवाहंमानवानांतथैकताम्॥ मेरुप्रभृ
तिशैलांश्च चूर्णयाम्यणुसंख्यया॥३५॥ पातालविवरैः स्वर्गस्वर्गैः पातालमेककम्॥ देवलोकं नराणांकुर्यांन्नलोकंत्रिदवौक

पा:

॥

सां॥३६॥ उद्धृत्य पृथिवीं छिद्या मनंतं नखत्वग्रकैः॥ ब्रह्मा संवारयामास सांत्वयन् प्रियभाषितैः॥३७॥ अन्यथा राक्षसम्
तेनारक्ष्यं जगतीतलम्॥ तत्पर्याचंद्रमसौ भूत्वा तिथिप्रणायनं त्वहम्॥३८॥ करिष्यामि ह ब्रह्मन्नत्वमिंद्रत्वं पृथिवीक्रियाम्॥ इत्ये
वं वसुधा गर्जन्ना जगाम तिकं प्रभोः॥३९॥ सेनाध्यक्षा राक्षसेंद्राः राज्ञा सार्द्धं समागताः॥ नानाप्रहरणोपेता नानारथपादातिकाः॥४०॥ एकै
कस्यापि पर्याप्ता जगतीनेति मन्महे॥ केषांचिदपि नामानि भारद्वाज निबोध मे॥४१॥ कोटिशो मनसः पूर्णः शंखः पालो हस्तीमुखः॥ पि
शुकः कोणपश्चैव कालनेगः प्रकालनः॥४२॥ हिरण्यबाहुः शरणः कश्मकः कालदंतकः॥ पुंडको मंडलकः पिंडशेफा रभेणकः॥४३
उच्छिकः स्वरमोमुद्रो विंचो जेता विरोहकः॥ शिलीशलकरोमकः सुकुमारः प्रोपणः॥४४॥ मुंडारः शशरोमा च सुरोमा च महाहनुः॥ पाराव
तः पारिपात्रः पांडुरो हरिणः कृशः॥४५॥ विहंगः शरभो मोदः प्रमोदः सहनापनः॥ एरकः कुंडलो वेणीस्कंधश्चैव कुमारकः॥४६॥ कुवा
हुकः शंखवेगो धूर्तकः पातपातकौ॥ शंकुकर्णः पिंगकश्च कुठीरमुखसेचकौ॥४७॥ पूर्णांगदः पूर्णमुखः प्रभाषः सकुलिर्हरिः॥ प्रमाहको
कमठकः सुखेणो मानसो व्ययः॥ भैरवो मंडवेदांगः पिशंगः शौंडपालकः॥ त्रिषभो बेगवान्नाम पिंडारकमहाहनू॥४९॥ रक्तांगः सर्वसारंगः स
मृद्धपारवासकौ॥ वराहको रावणकः सुचित्रवेणिकः परः॥५०॥ पराशरस्तरंगको मणिस्कंधस्तथारुणः॥ सेनाध्यक्षौ महाज्वलनभ्रमपाने
परिकीर्तिताः॥५१॥ प्रधान्येन बहुत्वाच्च न सर्वे परिकीर्तिताः॥ न शक्याः परिसंख्यातुं येषु ज्ञायसमागताः॥५२॥ नीलरक्तासिता घोरा महाका

60

श्र·गी·॥३०॥

यामहाबलाः ॥ सप्तशीर्षा द्विशीर्षाश्च पंचशीर्षास्तथापरे ॥५३॥ कालानलसमहाबाहो हुताशनसमप्रभाः ॥ महाकाया महावेगाः शैलशृंग
समुच्छ्रयाः ॥५४॥ योजनायामविस्तारा द्वियोजनसमायताः ॥ कामरूपाः कामबलाः दीप्तानलसमत्विषः ॥५५॥ अन्येच बहवः शूराः
शूलपट्टिशधारिणः ॥ दिव्यप्रहरणोपेता नानावेगविभूषिताः ॥५६॥ शृणु नामानि चान्येषां येन्येरावरासैनिकाः ॥ शंकुकर्णो
निकुंभश्च पद्मः कुमुद एव च ॥५७॥ अनंतो द्वादशभुजस्तथा कृष्णोपकृष्णकौ ॥ घ्राणश्रवाः कपिस्कंधः कांचनाक्षो जलंधमः ॥
५८॥ अक्षसंतर्दनो ब्रह्मन् कुनदीकस्तमोन्थकृत् ॥ एकाक्षो द्वादशाक्षश्च तथैवैकजटाभिधः ॥५९॥ सहस्रबाहुर्विकटो व्याघ्राक्षः
क्षितिकंपनः ॥ पुण्यनामा सुनामा च सुवक्त्रः प्रियदर्शनः ॥६०॥ परिश्रितः कोकनदः प्रियमाल्यानुलेपनः ॥ अजोदरो गज
शिरास्कंधाक्षः शतलोचनः ॥६१॥ चतुर्दंष्ट्रोऽष्टजिह्वो मेघनादः पृथुश्रवाः ॥ विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ॥६२
उदाराक्षो रथाक्षश्च वज्रनाभो वसुप्रभः ॥ समुद्रवेगो विप्रेंद्र शैलकंपी तथैव च ॥६३॥ वृषः प्रवाहवर्षश्च तथा नंदोपनंदकौ ॥ धूम्रः
श्वेतः कलिंगश्च सिद्धार्थो वरदस्तथा ॥६४॥ प्रियकश्चैव नंदश्च गोनंदश्च प्रतापवान् ॥ आनंदश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा ॥
६५॥ क्षेमवाहुः सुवाहुश्च सिद्धपात्रश्च सुव्रतः ॥ गोव्रजः कनकापीडो महापारिषदेश्वरः ॥६६॥ गायनो हसनश्चैव बाणश्चैव वी

॥३०॥

र्यवान्॥ वैनालको वेगगतिस्तथा कथकः कर्करौ॥६७॥ हंसकः पंकदिग्धांगो समुद्रोन्मादनश्च ह॥ वरणोत्कटः प्रलम्बश्चै
नसिंहश्चनंदकः॥६८॥ एते वाराह वराः सैन्यपाः॥ नानायुधाप्रहरणो रथेषु॥ हंसेषु मेषेषु वृषेषु वीरा रामं प्रतस्थुः कन
सिंहनादाः॥६९॥ इत्यार्षे रा॰ वा॰ आ॰ अ॰ रावणसैन्यनिर्याणं नामाष्टादशः सर्गः॥१८॥ रावणस्यौरशाः पुत्राः सर्वे राक्षसपुंग
वाः॥ नानाप्रहरणोपेताः दुर्द्धराः सर्वरणो॥१॥ नामान्येषां प्रवक्ष्यामि भरद्वाज शृणुष्व मे॥ कालकंठः प्रभावश्च तथा कुं
देवप्रसीवसोमपुः॥
भांडकोपरः॥२॥ कालकाक्षः सितश्चैव मन्मथनस्तथा॥ पद्मबाहुः प्रबाहुश्च कीर्तिश्च महाबलः॥३॥ मजालश्च मह
तेजाः क्रथकायश्च सुव्रतः॥ तुहरश्च तुहारश्च चित्रदेवश्च वीर्यवान्॥४॥ मधुरः सुप्रसादश्च कीर्तिश्च महाबलः॥ वसनो
मधुवर्णश्च कलशोदरएव च॥ धर्मदो मन्मथकरः सूचीवक्त्रश्च वीर्यवान्॥ श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पांडवः
॥६॥ दंडबाहुः सुबाहुश्च रजकोविकलस्तथा॥ अचलः कालकाक्षश्च बालेशो बालभक्षकः॥७॥ संचारकः कोकनदो गृ
ध्रपत्रश्च जंबुकः॥ लोहाजको कौजवनः कुंभवक्त्रश्च कुंभकः॥८॥ मुंडग्रीवश्च कृष्णोजा हंसवक्त्रश्च चंद्रमाः॥ पाणि
कूर्चाच शंकुकः पंचवक्त्रश्च शिक्षकः॥९॥ चाषवक्त्रः जंबुकश्च शंखवक्त्रश्च कुंजरः॥ एते रावणपुत्राश्च महावीर्यं

पराक्रमाः ॥१०॥ बाहुशब्दैः सिंहनादैः पूरयंतो दिशो दश ॥ एषां सैन्यसहस्राणां सहस्राण्यर्बुदानि च ॥११॥ नानाकृतिवीररूप
विविधायुधपाणयः ॥ कूर्मकुक्कुटवक्त्राश्च दीर्घवक्त्राश्च सर्वशः ॥१२॥ गोमायुमुखवक्त्राश्च शशोलूकमुखास्तथा ॥ खरो
ष्ट्रवदनाश्चैव वराहवदनास्तथा ॥१३॥ मनुष्यमेषवक्त्राश्च शृगालवदनास्तथा ॥ मार्जारशशवक्त्राश्च दीर्घवक्त्राश्च
केचन ॥१४॥ नकुलोलूकवक्त्राश्च काकवक्त्रास्तथा परे ॥ आखुबभ्रुकवक्त्राश्च मयूरवदनास्तथा ॥१५॥ मत्स्यमेषान
नाश्चैव अजाविमहिषाननाः ॥ ऋक्षशार्दूलवक्त्राश्च द्वीपिसिंहाननास्तथा ॥१६॥ गोखरोष्ट्रमुखाश्चैव वृषदंशमुखास्त
था ॥ महाजरारपाराश्च तावकाक्षाश्च दुर्मुखाः ॥१७॥ पारावतमुखाश्चान्ये तथा वृषमुखाः परे ॥ कोकिलाभाननाश्चान्ये
श्येनतित्तिकास्तथा ॥१८॥ कृकलाशमुखाश्चैव विरजांबरधारिणः ॥ व्यालवक्त्राः शुकमुखाश्चंडवक्त्राः शुकाननाः
१९॥ आशीविषाश्चीरधरा गोनासावरणास्तथा ॥ स्थूलोदराः कृशांगाश्च स्थूलांगाश्च कृशोदराः ॥२०॥ ह्रस्वग्रीवा मह
कर्णा नानाव्यालविभूषिताः ॥ गजेंद्रचर्मवसनास्तथा कृष्णाजिनाः पराः ॥२१॥ स्कंधेमुखा द्विजश्रेष्ठ तथास्योदरतोमुखाः
॥ पृष्ठेमुखा हनुमुखास्तथा जंघामुखा अपि ॥२२॥ पार्श्वाननाश्च बहवो नानादेशमुखास्तथा ॥ तथा कीटपतंगानां सदृ

ग

श्यामलाननाः ॥२३॥ नानायालमुखाश्चान्ये बहुबाहुशिरोधराः ॥ नानावक्षोभुजाः केचिद्भुजंगवदनाः परे ॥२४॥ वीराः संहतगा
त्राश्च नानाफलकराश्च सः ॥ नानावेषधराश्चान्ये नानामाल्यानुलेपनाः ॥२५॥ नानावस्त्रधराश्चैव चर्मवाससएव च ॥ उ
ष्णीषिणो मुकुटिनः कंबुग्रीवाः सुवर्चसः ॥२६॥ किरीटिनः पंचशिखास्तथा कठिनमूर्द्धजाः ॥ त्रिशिखा द्विशिखाश्चैव तथा सप्त
शिखास्तथा ॥२७॥ शिखंडिनो मुकुटिनः मुंडाश्च जटिलास्तथा ॥ चित्रमालाधराः केचित्केचिद्रोमाननास्तथा ॥२८
विग्रहैकरसा नित्यमजेयाः सुरसत्तमैः ॥ कृष्णा निर्मांसवक्त्राश्च दीर्घपृष्ठा निरूदराः ॥२९॥ स्थूलपृष्ठा महाकायाः प्रलंबो
दरमेहनाः ॥ महाभुजा ह्रस्वभुजा ह्रस्वगात्राश्च वामनाः ॥ कुब्जाश्च ह्रस्वजंघाश्च हस्तिकर्णशिरोधराः ॥ हस्तिनासाः कूर्म(नासा)वृकनासा
स्तथा परे ॥३०॥ वारणेंद्रनिभाश्चान्ये दीप्तिमंतः स्वलंकृताः ॥ पिंगाक्षाः शंकुकर्णाश्च वक्रनासास्तथा परे ॥ पृथुदंष्ट्रा महादंष्ट्रा
स्थूलोष्ठा हरिमूर्द्धजाः ॥ नानापादोष्ठदंष्ट्राश्च नानाहस्तशिरोधराः ॥ नानाचर्मभिराछन्ना नानाभाषाश्च सुव्रत ॥ हृष्टाः
परिपतंति स्म महापरिघबाहवः ॥३४॥ दीर्घग्रीवा दीर्घनखा दीर्घशीर्षभुजास्तथा ॥ पिंगाक्षा नीलकंठाश्च स्वर्णवर्णाश्च सुव्र
त ॥३५॥ वृकोदरनिभाश्चैव केचिदंजनसंनिभाः ॥ श्वेतलोहितग्रीवाश्च पिंगाक्षाश्च तथा परे ॥३६॥ कल्माषा बहवो
विप्रचित्रवर्णाश्च केचन ॥ चामरापीडकनिभाः श्वेतलोहितपासापः ॥३७॥ नानावर्णसुवर्णाश्च मयूरसदृशप्रभाः ॥ पाशोद्यतकराः केचि

असिमुद्गरहस्ताश्च दंडहस्ताश्च केचन॥ गदामुशुंडिहस्ताश्च तथा तोमरपाणयः॥

त्व्यादिनास्याखराननाः॥३८॥ शतघ्नीचक्रहस्ताश्च तथा मुशलपाणयः॥ आयुधैर्विविधैर्घोरैर्महात्मानो महाजवाः॥३९॥
महाबलाः महावेगा असंख्याता विनिर्ययुः॥ घंटाजालानपिनद्धांगा नन्दुस्ते रणाजिरे॥४०॥ कोटिशो विटकाक्षभाषिण
गो यातुधाननगणा सैन्यपालकाः॥ दुद्रुवुस्त्वरितं सैन्यराक्षसाण्ण धावमाना धावहन पोथवादिनः॥४१॥ इत्यार्षे रा॰वा॰
आ॰ अ॰ रावणपुत्रनिर्याणं नाम एकोनविंशतितमः सर्गः॥१९॥ धनुर्विक्षिप्य विधुन्वानास्ततो वैश्रवणानुजः॥ कोयं कि
मर्थमायात इति चिंतापरो भवत्॥१॥ ततो गगनसंभूता वाणीममुपस्थिता॥ भो रावण महावीर रामो यं समुपागतः॥
राघवो यमयोध्यायां राजा धर्मस्वरूपधृक्॥२॥ लंकायां निहतो नेन दारामर्षीनिवानुजः॥३॥ त्वद्वधार्थमिहायातो
विभीषणवरप्रदः॥ भ्रातृमित्रैर्नरैः ऋक्षैः राक्षसैर्मानुषैर्वृतः॥४॥ श्रुत्वा तु रावणो वाक्यं रावणो लोकरावणः॥ क्रो
धमाहारयामासमक्षिपुरां मुनिपुंगव॥५॥ हन्यतां वध्यतामेष मानुषो रिपुसंस्थितः॥ मम विश्वजितः साक्षाद्रण
यमनुपागतः॥६॥ इत्युक्त्वा रावणो राजा नानाराक्षसाः पर्वतोपमाः॥ चिक्षिपुः महाराक्षसः पुष्पकोपरि सुप्रत॥७॥ राक्ष
सीता चमूर्वीरा वानरान् रक्षमानुषान्॥ चखाद कांश्चिद्दारयपोथयामास दर्पितान्॥८॥ सा च शाखामृगीसेना

राघवस्य च मानुषी ॥ रावणस्यानुगान् वीरा जघ्नुर्वानरपर्वतैः ॥९॥ तेऽन्योन्यं वधमिच्छन्तो युयुधुः सैनिकोत्तमाः ॥ पेतुर्वेगैश्च रुधिरं राक्षसा वा
नरा नराः ॥१०॥ ततो रामो महाबाहुर्भरतो लक्ष्मणस्तथा ॥ शत्रुघ्नो हनुमान्वीरः सुग्रीवो जांबवांस्तथा ॥११॥ अन्ये च नलनीलाद्या वि
भीषणपुरोगमाः ॥ युयुधुस्ते महाघोरं महाघोरे रणाजिरे ॥१२॥ निर्जघ्नुश्चापि नेदुश्च विक्षिपुश्चाथ राक्षसान् ॥ गजान्युद्धोत्तम
हान्मानः संग्रामेष्वनिवर्तिनः ॥१३॥ आस्फोटितैर्नर्दितैश्चालयन्निव मेदिनीम् ॥ राक्षसांसिंहनादैश्च परिपूर्णं नभस्तलम्
॥१४॥ ते प्रयुध्यंत मुदिता राक्षसेंद्रा महाबलाः ॥ प्रययुर्वानरानीकं समुद्यतशिलायुधाः ॥ युयुधू राक्षसं सैन्यं नरवानरराक्षसाः ॥
हस्त्यश्वरथसंबाधं किंकिणीशतनादितम् ॥१६॥ नीलजीमूतसंकाशैः समुद्यतशिलायुधैः ॥ दिव्यानलरविप्रख्यैर्नैर्ऋतैः सर्व
तोद्यतम् ॥१७॥ तद्वीक्ष्य राक्षसबलं लब्धलक्षाः प्लवंगमाः ॥ ससर्जुश्च शिलाजालं नादं मुदा नेदुः प्लवंगमाः ॥१८॥ विचेरुरुद्यतैः शै
लैः नगाः शिखरिणो यथा ॥ केचिदाकाशमारुह्य केचिद्भूमौ प्लवंगमाः ॥१९॥ क्रुद्धास्तद्राक्षसं सैन्यं जघ्नुर्द्रुमशिलायुधाः ॥ ते
पादपशिलाः शैलैस्तां चक्रुर्वृष्टिमनुत्तमाम् ॥२०॥ रक्षांसि द्वैर्वज्रसंकाशैर्हरयो भीमविक्रमाः ॥ शिखरैः शिखराभास्ते यातुधाना
न्प्रमर्दयन् ॥ निजघ्नुः समरे क्रुद्धाः हरयो राक्षसर्षभान् ॥ केचिद्रथगतांश्चैव गजवाजिगतानपि ॥२२॥ निजघ्नुः सहसा प्लुत्य यातुधा
नान् प्लवंगमाः ॥ शैलशृंगनिभास्तेषु मुष्टिनिक्रांतलोचनाः ॥२३॥ चिपेतुश्चखिनेदुश्च ततो राक्षसपुंगवाः ॥ ततः शूलैश्च शर
क्षैश्च विसृष्टैर्हरिराक्षसैः ॥२४॥ मुहूर्तेनावृता भूमिरभवच्छोणितकर्दमा ॥ विकीर्णैः पर्वताग्रैश्च रक्षोभिरुपमर्दितैः ॥२५॥ आक्षिप्ता

युद्ध०

श्री॰रा॰ ३३॥

क्षिप्यमाणाश्च भग्नरोषाश्च वानराः ॥ वानरांश्चैव तु ऋक्षांश्चैव जघ्नुर्वीरा हि राक्षसाः ॥२६॥ राक्षसांश्चर्क्षसैरेव निष्पेषुर्वनिरायु
धि ॥ आक्षिप्य च शिरो जघ्नू राक्षसा वानरांस्तथा ॥२७॥ तेषामाच्छिद्य शस्त्राणि जघ्नुस्तानपि वानराः ॥ निजघ्नुः शैलशिखरैः वि
भिन्नाश्च परस्परम् ॥२८॥ सिंहनादान्विनेदुश्च रणे वानरराक्षसाः ॥ छिन्नवर्मतनुत्राणा राक्षसा वानरैः कृताः ॥२९॥
सुस्रावरुधिरं तेभ्यः स्रवंतः पर्वता इव ॥ रथेन रथिनं चैव राक्षसं राक्षसेन च ॥३०॥ हयेन च हयं केचिन्निष्पेषुर्धरणी
तले ॥ तस्मिंस्तदा वर्तमाने कोलाहले राक्षसराजधान्याम् ॥ संहर्षमाणेषु च वानरेषु निपात्यमानेषु च राक्षसेषु ॥३१॥
प्रभज्यमानेषु महाबलेषु महर्षयो भूतगणाश्च नेदुः ॥ ते चापि सर्वे हरयः प्रहृष्टा विनेदुरक्षोभितसिंहनादैः ॥३२॥ इत्यार्षे
रा॰ वा॰ आ॰ श्री॰ वानरराक्षसयुद्धसंकुलं विंशतितमः सर्गः ॥२०॥ ततो रथं मारुततुल्यवेगमारुह्य शक्तिं निशितां प्रगृह्य ॥

रावणोप

स रामबलं प्रविष्टः विवेश मीनः स यथार्णवोत्तमम् ॥१॥ स वानरान्हीनबलान्निरीक्ष्य प्राणेन दीप्तेन रराज राजा ॥२ ऋक्षरोनेंद्र
रिपुर्महात्मा न हंतुमैच्छन्नरवानरांश्च ॥ मनसा चिंतयामास सहस्रकंधरः स्वराट् ॥२॥ एते क्षुद्राः समायाताः प्राणांस्त्यक्त्वा धनानि
च ॥३॥ द्वीपांतरं महत्प्राप्य मम युद्धाभिकांक्षिणाः ॥ किं स्यान्मम महत्त्वैरेतैः क्षुद्रैर्वानरराक्षसैः ॥४॥ यस्माद्देशात्समायाता
स्तं देशं प्रापयाम्यहम् ॥ क्षुद्रत्वे के तु शरा बाणं तं न प्रशंसंति पंडिताः ॥५॥ इति संचिंत्य धनुषा वायव्यास्त्रं युयोज ह ॥ तेनास्त्रेण
नरा ऋक्षा वानरा राक्षसा हिते ॥६॥ यस्माद्यस्मात्समायातास्तं तं देशं प्रवेशिताः ॥ गलेहस्तिकया विप्र चोरा राजभटा इव ॥७॥ ते

रा॰१ ॥३३

67

सर्वे स्वर्गं हृप्राप्य अस्त्रवेगेन विस्मिताः ॥ कस्थिता कुत आयाता मन्यंते स्वप्नसंभवे ॥८॥ प्रलयानिलवेगेन अस्त्रेरावं चिनाम्नशमू ॥ अ

२राः रतो लक्ष्मणश्चापि विशल्यो हनुमानपि ॥९॥ सुग्रीव नलनीलाद्या हरयो निरंहसः ॥ विभीषणपुरोगाश्च राक्षसाः क्रूरविक्रमाः ॥

१०॥ वानराश्च नरा रक्षा साक्षता प्रापिता गृहम् ॥ प्राप्ता इति विस्मिताः सर्वे शोचंतो राममेव हि ॥११॥ उष्पकेति ष्ठतिरामो मसीतो

राघवः परः ॥ आसीत्तस्मिन्नास्त्रवेगो यं रामं चालयितुं क्षमः ॥१२॥ महर्षयोऽपि तत्रासन् किमेतदिति विस्मिताः ॥ सापि सीता महाभागा

तत्रासीत्स्म सुविस्मिता ॥१३॥ गंधर्वनगराकारं दृष्ट्वा राम बलं महत् ॥ स्वस्तीति वादिनः सौम्य शांतिं जेपुर्महर्षयः ॥१४॥ अंत

रीक्षचराः सर्वे हाहाकारं प्रचक्रिरे ॥ देवा अग्निमुखा विप्र किंलत्तं रावणेन हि ॥१५॥ गरुडस्यो तदा विष्णू रावणं हंतुमागतः ॥ लक्ष्मी

लवणांभोधौ क्षिप्तो विष्णुः सवाहनः ॥१६॥ सा इत्सं विनिघोष्यैर रक्षसा वामपानिना ॥ ततः प्रभृति देवा ये गंधर्वाः किंनरा नराः ॥

१७॥ गंधमस्य नगर्हंति शार्दूलस्येव जंबुकाः ॥ सो यं विष्णुर्दशरथाज्जातो देवः सनातनः ॥१८॥ अस्माकं भागधेयेन रामो

जयतु रावणान् ॥ परस्परं सुराः सर्वे वदंत इति विस्थिताः ॥१९॥ ननर्द च सहस्रास्य क्षुद्रं मत्वा सराघवम् ॥ विसस्माय च रामो

पि दृष्ट्वा तत्कर्म दुष्करम् ॥२०॥ क्रोधमाहारयामास रावणस्य वधं प्रति ॥ ततः किलकिलाशब्दं चक्रू राक्षसपुंगवाः ॥ सराघ

वः पद्मपत्राक्षःलोचनो जज्वाल कोपेन द्विषज्जयैषणः ॥ रामं प्रधर्तुं न शशाक मेदिनीचक्रं पिरेवारिधयो महान् अपि ॥२२

इत्यार्षे रा० वा० आ० अ० रामकाव्ये नाम एकविंशतितमः सर्गः ॥२१॥ विनिर्दिष्टं रिपुं दृष्ट्वा रामः शत्रुनिबर्हणः ॥ जज्वाल च स

68

कोयेन रक्षसां मह्जो रिपुः ॥१॥ विचकर्ष धनुः श्रेष्ठं ज्वलनानलसंनिभम् ॥ ससर्ज बाणान्वेगेन रक्षसां मर्मसु प्रभुः ॥२॥ तिलशः खंड
यंति स्म बाणा राक्षसपुंगवान् ॥ कदा धत्ते षिसंधत्ते कदा विसृजति प्रभुः ॥३॥ नांतरं ददृशे कश्चित्तस्यैवं सृजतः शरान् ॥ जघ्नात्रा
क्षसान्रामो रुद्रः पशुगणानिव ॥४॥ ततः दृष्ट्वा दुष्करं कर्म कृतं रामेण रावणः ॥ अनीकानि समासाद्य युयुधे राघवेण हि ॥
५॥ रे रे राक्षससेनाद्याः प्रेक्षकाः इव तिष्ठत ॥ अहमेको हनिष्यामि नरमाकस्मिकं रिपुम् ॥६॥ अद्य निर्मानवीं पृथ्वीं निर्देवं त्रिदि
दिवं तथा ॥ करिष्याम्यहमेवैकः शोषयिष्यामि वारिधीन् ॥७॥ पर्वतान्चूर्णयिष्यामि पातयिष्यामि वै ग्रहान् ॥८॥ इत्यु
क्त्वा रावणो युद्धं रामेण सह चारभत् ॥ बभूव द्वैरथं युद्धं बलिनावुभयोरिव ॥ रावणो प्राप्य रामोपि परं हर्षमुपागमत् ॥९॥ तद्दु
तमहद्युद्धं द्वैरथं रोमहर्षणम् ॥ रामस्य च महाबाहोर्बलिनो रावणस्य च ॥१०॥ गांधर्वेण च गांधर्वं दैवं दैवेन राघवः ॥ अस्त्रं राक्ष
सराजस्य जघान परमास्त्रवित् ॥११॥ अस्त्रे युद्धे प्रतिहते रावणो राक्षसेश्वरः ॥ ससर्ज परमक्रुद्धः पुनरेव स राघवे ॥१२॥ ते
रावणविनिर्मुक्ताः शराः कांचनभूषिताः ॥ अभ्यवर्षत काकुत्स्थं सर्पा भूत्वा महाविषाः ॥१३॥ ते सर्पवदना घोरा वमंतो ज्वल
नं मुखैः ॥ राममेवाभ्यवर्तंत व्यादितास्या भयावहाः ॥१४॥ तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः ॥ सोपर्णमस्त्रं तद्घोरं पु
नः प्रावर्तयद्रणे ॥१५॥ दिशश्च विदिशश्चैव समंतादावृता भृशम् ॥ रामः संभ्रांततो दृष्ट्वा पन्नगान्स्तान्सहस्रशः ॥१६॥ रामे
णा च शरा मुक्ता रुक्मपुंखाः शिलाशिताः ॥ सुपर्णाः कांचना भूत्वा विचेरुः सर्पशत्रवः ॥१७॥ ते तान्सर्पान्शरान् जघ्नुः

सर्परूपान्महाविषान्॥सुपर्णरूपास्तेन रामा सृजति सर्पान्महाविषान्॥१८॥सुपर्णरूपा रामस्य विशिखाः कामरूपिणः॥अस्त्रे प्रतिहते
क्रुद्धो रावणो राक्षसाधिपः॥१९॥अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः॥विव्याध दुर्धर्षं गंधर्वास्त्रं रणापि नरस्तथा॥२०॥राममानं
तदा दृष्ट्वा निशाचरपरमर्षयः॥राम चंद्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा॥२१॥प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम्॥समाक्र
म्य बुधस्तस्थौ प्रजानामहिते रतः॥२२॥सधूमः परिवृत्तोर्मिः प्रज्वलन्निव सागरः॥अदृश्यत करध्वांतः समस्तो धूमकेतुना॥२३
रामोपि व धात्र कुटीं क्रोधसंरक्तलोचनः॥उत्पपात तदा चोल्का स्पृशन्निव दिवाकरम्॥२४॥नष्टरूपश्च पुरुषो मंदरश्मिर्दिवा
करः॥क्रोधं चकार सम्भृशं निर्दहन्निव राक्षसम्॥२५॥तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः॥सर्वभूतानि वित्रेसुः प्राकं
पत महीतदा॥२६॥सिंहशार्दूलवान् शैलः प्रजज्वाल कुलाचलः॥बभूव करक्षुभितः समुद्र इव पर्वसु॥रुक्षाश्च खरनि
र्घोषा गगने परुषा घनाः॥२७॥औत्पातिकानि तर्दंतः समकंपाः परिबभ्रमुः॥तं कापां रावणाव धेयः प्रयुक्तो शरः प्रभुः॥२८॥
जग्राह तं शरं दीप्तं निःश्वसंतमिवोरगम्॥यमस्मै प्रथमं प्रादादगस्त्यो भगवानृषिः॥२९॥ब्रह्मदत्तं महावाणं जग्राह युधितं व
धे॥ब्रह्मणा निर्मितं पूर्वं इंद्रायामिततेजसे॥३०॥दत्तं सुरपतेः पूर्वं त्रैलोक्यजयकांक्षिणो॥यस्य पक्षेषु पवनः फले भास्करपाव
कौ॥३१॥शरीरमाकाशमयं गौरवे मेरुमंदरौ॥पर्वस्वपि च विन्यस्ता लोकपाला महौजसः॥३२॥धनदो वरुणश्चैव पाशहस्तस्त

७०

अ॰रा॰।

थांतकः॥ज्वाज्वल्यमानं वपुषासुपुंखं हेमभूषितम्॥३३॥तेजसा संभृतानां भांतं भास्करवर्चसम्॥सधूममिव कालाग्निं
दीप्यमानं रविं यथा॥३४॥रथानागाश्ववृंदानां भेदनं क्षिप्रकारिणम्॥परिघाणां सहस्राणां गिरीणां चैव भेदनम्॥नानारु
धिरसिक्तांगमेदोदिग्धं सुदारुणम्॥कालाभं तं महानादं नानाशक्तिविनाशनम्॥३६॥शत्रूणां त्रासजननं सपक्षमिव
पन्नगम्॥काकगृध्रबकानां च गोमायुरक्षसाम्॥३७॥नित्यं भक्षप्रदं युद्धे राक्षसानां भयावहम्॥द्विषतां कीर्तिहरणं प्र
कर्षकरमात्मनः॥३८॥अभिमंत्र्य ततो रामस्तं महेषुं महाभुजः॥वेदप्रोक्तेन विधिना कुंडलीकृतकार्मुकम्॥३९॥सराव
णाय तं वेगाद्विक्षेप शरमुत्तमम्॥तस्य पक्षो धनुर्मुक्तो हंतुं रामेण रावणम्॥४०॥धूमपूर्वं प्रजज्वाल प्राप्य वायुपथं महत्॥तं व
ज्रमिव दुर्धर्षं वज्रपाणिविसर्जितम्॥४१॥कृतांतमिव दुर्वार्यं रावणो वीक्ष्य तं परम्॥हुंकृत्वा किल जग्राह वारणं वामेन पा
णिना॥४२॥तत् शरं जानुना कृष्य बभंज राक्षसाधिपः॥भग्ने तस्मिन् शरे रामो विमना इव तस्थिवान्॥४३॥सहस्रकंधरः क्रु
द्धः क्षुरं वरगृह्य सायकं॥विद्याधराबवं वक्षे सर्वप्राणेन राक्षसः॥४४॥वक्षो निर्भिद्य स शरो रामस्य सुमहात्मनः॥भित्वा महीं वस
हसा पाताल[तेन]ं मा विशत्॥४५॥ततो रामो महाबाहुः पपात पुष्पकोपरि॥निःसंज्ञो निश्चलश्चासीत् हाहाभूतानि चक्रिरे॥४६॥प्र
कंपन मही सर्वा सपर्वतवनाब्धिका॥अपयः कौदिशि कास्ते हा राम इति वादिनः॥४७॥दशशतवदनो जितारिसंघो रराज शिरः

सिंवसनं नर्तमानुगोचराः॥ गगननलगता निपेतुरुल्काः प्रलयकराइवमेनिरेजनौघाः॥४८॥ इत्यार्षे रा० वा० आ० अ० रामस्वर्गाधि
तं नाम द्वाविंशस्सर्गः॥२२॥ रामं तथाविधं दृष्ट्वा मुनयो भयविह्वलाः॥ हाहाकारं प्रकुर्वंतः शांतिजेपुश्च केचन॥१॥ नद्यस्तु
मुनिभिर्दृष्ट्वा सीता प्रहसितानना॥ वसिष्ठप्रमुखाः सर्वे सीतां प्रोचुर्महर्षयः॥२॥ सीते कथं श्राविता यं रावणो राघवस्तु
त्वया॥ समुत्पन्नो विपाको यं घोरो जनकनंदिनि॥३॥ क्व गताः भ्रातरः सर्वे क्व गता वानरर्षभाः॥ मंत्रिणः क्व गता भद्रे राम
स्य किमुपस्थितम्॥४॥ श्रुत्वैतद्वचनं तेषां मुनीनां भावितात्मनाम्॥ रामं तथाविधं दृष्ट्वा शयानं पुष्पकोपरि॥५॥ पुं
डरीकनिभे नेत्रे निमील्यरत्नमूर्द्धनि॥ आलिंग्य घोरसा सुप्तं प्रियामिव धनुःशरम्॥६॥ नदंतं राक्षसं चापि महाबलपरा
क्रमम्॥ साट्टहासं विनिघ्नोच्चैः सीता जनकनंदिनी॥७॥ स्वरूपं प्रजहौ देवी महाविकटरूपिणी॥ क्षुत्क्षामा कोटराक्षी
च चक्रभ्रमितलोचना॥८॥ दीर्घजंघा महारावा मुंडमालाविभूषणा॥ अस्थिकिंकिणिभीमा च भीमवेगपराक्रमा॥९॥
खरस्वरा महाघोरा विकृता विकृतानना॥ चतुर्भुजा दीर्घतुंडा शरावालंकरणोज्वला॥१०॥ ललज्जिह्वा जटाजूटमंडिता चंडरोमिका॥
प्रलयांभोदकालाभा घंटारावविधारिणी॥११॥ अवस्कंघरथा तूर्णं खड्गखर्परधारिणी॥ श्येनीवरावणस्थे पपात निमि
षांतरे॥१२॥ शिरांसि रावणस्यास्तु निमिषांतरमात्रतः॥ खड्गेनतस्य चिच्छेद सहस्राणि हि लीलया॥१३॥ अन्येषां पौ

अ.रा.३६।।

धवीराणां शिरांसि निनखरैरणाहि।। छिन्नानि पातयामास भूमौ तेषां दुरात्मनाम्।।१४।। केषांचित्पाटयामास नखैः कोष्ठा
नि जानकी।। खड्गेन चाच्छित्कांश्चिन् रुन्न पार्दाश्च विच्छिदे।।१५।। खंडं खंडं चकारान्यान् तिलशः कांश्चिदेव हि।। अत्रा राय
न्यस्य चाकर्षत् पादघातेन कांश्चन।।१६।। पार्श्वेन निजबाणान्यान् पाणीन्यान पोथयत्।। कांश्चिच्छरीरवातेन दष्ट्वा
पन्यान पातयत्।।१७।। प्रलयं कुर्वती तीव्रा नाराक्षसानां भयंकरी।। निजघाना दृहासेन कांश्चित् पृष्ठे द्विधाकरोत्।।१८।। कां
श्चित्केशैः समाकृष्य निष्पिपेष महीतले।। रथान् गजानश्वान् गदान् सहतो मरान्।।१९।। कांश्चिद्घोधान् समाकृष्य
मज्जयामास वारिधौ।। गन्ने चोद्दध्य केषांश्चित्प्राणान् जग्राह जानकी।।२०।। केषांचित्स्कंधमारुह्य शिरांस्युत्पाट्य हि।। दिना
हुंकारेणाट्टहासेन कांश्चित्प्राणानहापयत्।।२१।। कांश्चित्प्रचूर्णवदनं पशुमारममारयत्।। तान्सर्वान्निमिषेणैव निह
त्य जनकात्मजा।।२२।। तेषामंत्रेण शिरसां मालाभिः कृतभूषणा।। रावणस्य शिरो ● नुग्रारायादाय रणमूर्द्धनि।।२३।।
कंदुकं क्रीडनं कर्तुं मनश्चक्रे मनस्विनी।। एतस्मिन्नंतरे तस्यां रोमकूपेभ्य उद्गताः।।२४।। मातरो विकृताकाराः साट्टहा
साः समापयुः।। सह कंदुकलीलार्थं सीतया ताः सहस्रशः।।२५।। तासां कांश्चित्समाख्यास्ये नामानि शृणु सुव्रत।। पा
भिर्व्याप्तास्त्रयो लोकाः कल्याणी मिश्वराचराः।।२६।। प्रभावती विशालाक्षी पालिता गोनसी तथा।। श्रीमती बहुला

।।:

चंडा तथैव वहुपुत्रिका ॥२७॥ प्रसुजाता च गोपाली दृढदंवालिका तथा ॥ जयावती मालतिका वंधुरं भा भयंकरी ॥२८॥
वसुदामा सुदामा च विशोका कांतिनंदनी ॥ एकचूडा महाचूडा चक्रनेमिश्च गोतमा ॥२९॥ तेजस्विनी जयासेना कमला
क्ष्यथ शोभना ॥ शत्रुंजया तथा चैव क्रोधना शलभीश्वरी ॥३०॥ मांसाधरी शुभ्रवस्त्रा तीर्थसेनी जटोज्वला ॥ गीतप्री
या च कल्याणी कद्रुरोमा मितासना ॥३१॥ मेघस्वना भोगवती सुभ्रूश्च कनकावती ॥ अलाताक्षी वेगवती विद्युज्जि
ह्वा च भारती ॥३२॥ पद्मावती सुनेत्रा च गंधरा वहुयोजना ॥ संतालिका महानाली कमला थ महावला ॥३३॥ सुदामा व
हुदामा च सुप्रभा च यशस्विनी ॥ नृत्यप्रिया परानंदा शतोलूखलमेखला ॥३४॥ शतघंटा शतानंदा भगनंदा भगारि

कालीय

णी ॥ वपुष्मती चंद्रसीता भद्रसरी मनाः ॥३५॥ संकारिका निःकुटिका भावचत्वारवासिनी ॥ सुमंगला सुप्रसन्नी वृद्धिका
मा जयप्रिया ॥३६॥ धनदा सुप्रसादा च भवदा च जनेश्वरी ॥ ऐडी भेडी समेडी च वेतालजननी तथा ॥३७॥ कंडूतिः
कंडुका चैव देवमित्रा सुदेविका ॥ अंवास्या केतकी चैव चित्रसेना च चंचला ॥३८॥ कुर्कुटिका शंखलिखा तथा शंकु
लिका हरा ॥ कंठालिका कालिका च कुंभका प्यतथोदरी ॥३९॥ उत्क्राथिनी जवेला च महावेगा च कंकना ॥ मनोज
वा कंटकिनी प्रवसा पूतना तथा ॥४०॥ खेचरयंती धनी रामा क्रोधना थतडित्प्रभा ॥ मंडोदरी च तुंडी च कोटरा मेघवाहिनी ॥४१॥

सुभगा लंबनीलंबा बहुचूडा विकस्थिनी॥ उर्द्ध्वेणीधरा चैव पिंगाक्षी लोहमेखला॥ प्रथुवक्त्रा मधुला कामधुकुंभा तथैव च॥ पक्षिणी
कामसुनिका जरायु र्जर्जराननाः॥४३॥ ख्याता दहदहा चैव तथा धमधमा द्विजा॥ चंडखंडा प्रथुश्रोणी पूषणा मरिणाकुहिका॥४४॥ अ
मोघा चैव निम्नौंचा तथा पयोधरा॥ शिशुमारमुखी श्येना लोहिताक्षी विभीषणा॥४५॥ जटालिका कामी चरी दीर्घजिह्वा बलोत्क
टा॥ कालेहिका पाकालिका मक्षिका मुकुटेश्वरी॥ लोहिताक्षी महाकाया हविः पिंडी च पिंडिका॥ एकत्वचा समा कुक्षा कर्णीका
र्णी च कर्णिका॥४७॥ क्षुरकर्णी चतुःकर्णी कर्णप्रावरणा तथा॥ चतुःपथनिकेता च गोकर्णी महिषानना॥४८॥ खरकर्णी म
हाकर्णी भेरीस्वनमहास्वना॥ शंखकुंभश्रवा चैव भंगदा च महाबला॥४९॥ गणा च सुगणा चैव तथा भीमा थ कामदा॥ चतुःपथरता चै
व भूततीर्थान्यगोचरा॥५०॥ पशुदा विसुदा चैव सुखदा च महायशाः॥ पयोदा गोमहिषदा सुविशाला चतुर्भुजा॥५१॥ प्रतिष्ठा सुप्रतिष्ठा
च रोचमाना सुरोचना॥ नौकर्णी च मुखकर्णी च श्रशिवा मंथिनी तथा॥५२॥ एकवक्त्रा मेघवादा मेघनामा विरोचना॥ एताश्चा
न्याश्च बहवो मातरः कोटिकोटिशः॥५३॥ असंख्यातास्समाजग्मुः क्रीडंतिसीतयाः सह॥ दीर्घदंत्यो दीर्घदंत्यो दीर्घतुंडो द्विजोत्तमा॥
५४॥ सरसा मधुराश्चैव यौवनस्थाः स्वलंकृताः॥ महात्म्येन च संयुक्ताः कामरूपधरास्तथा॥५५॥ निर्मांसगात्र्यः श्वेताश्च तथा कांचन

तन्निभाः॥ कृष्णमेघनिभाश्चान्या धूम्राश्च द्विजपुंगव॥५६॥ अरुणाभा महाभागा दीर्घकेश्यः सितांबराः॥५६॥ वेणीधराश्चैव पिंगा-
क्ष्यो लंबमेखलाः॥५७॥ लंबोदर्यो लंबकर्णास्तथा लंबपयोधराः॥ तांम्राक्ष्यस्ताम्रवर्णाश्च हर्यक्षाश्च तथापराः॥५८॥ शत्रूणां वि-
ग्रहे तस्मिन्भयदास्ता भवंत्यपि॥ कामरूपधराश्चैव जवेनायुसमास्तथा॥५९॥ शिरांसि रक्षसां गृह्य गंडशैलोपमान्यथा॥ वि-
क्रीडुः सीतया सार्द्धं तस्मिन्नरणधरातले॥५०॥ मुंडमालाधराः काश्चित्काश्चिन्मुक्तविभूषणाः॥ रणांगणे महाघोरे गृध्रकंक-
शिवान्विते॥५१॥ मांसासृक्कृपपतिते घोरे नचतत्रसुरोपमे॥ ननर्त जानकी देवी घोरकाली महाबला॥५२॥ तया चकंपे पृथिवी नै-
रिवानिलचालिता॥ चेलुश्च भूधराः सर्वे समुद्राश्च चकंपिरे॥५३॥ स्वर्गिणां च विमाना निरवातपेतुर्भयतो द्विज॥ सूर्यस्यदुर्दु-
र्मीताबाजिनो मुक्तरश्मयः॥५४॥ पदा नसेहे जानक्या भारं सोढुं वसुंधरा॥ गंतुमैच्छच्च पातालं सीतापादाग्रताडिता॥६५॥ अह-
हासेन सीताया मातृणां हुंकृतेन च॥ त्रैलोक्यं मेनिरे लोकाः किंमेतदिति विस्मिताः॥६६॥ धरा पातालगमनं वितर्क्य सुरसत्तमैः॥ सं-
प्रार्थितो महादेवः स्वयमायाद्रणाजिरे॥६७॥ जानक्याः पदविन्यासे शवरूपधरो हरः॥ आत्मानं स्तंभयामास धरणी धृतिहेतवे॥६८
सर्वभारसहो देवः सीतापादतले स्थितः॥ शवरूपविरूपाक्षः स्वस्थानात्तु तदा॥६९॥ तथा प्युपरिगा लोका न स्थात्तुं सेहिरे क्षणम्॥ सीता-
याः पदशब्देन शिरसा टंकृतेन च॥७०॥ निश्वासवातसंघातैर्दुस्थिता भूर्भुवादयः॥ इति धरणीसुतायाः पश्यन्नृत्यं धरण्यां प्रसकृतदु-

अ॰रा॰३८॥

नमस्कारं चिंतयंतो द्विजेंद्राः॥ जयति जयति सीतेत्याहुरिंद्रादिदेवाः स्तुवति त्रिभुवनमंगं मन्यमाना विशेषुः॥८०॥ इत्यार्षे रा॰वा॰आ॰
अ॰ सहस्रवदनरावणवधो नाम त्रिंशतितमः सर्गः॥ ततः संभ्रमवेगं सीतायाः वीक्ष्य ब्रह्मरुद्रोरगमाः॥ सर्वे लोकपालास्त्रिदशाश्च
ऋषिभिः पितृभिः सह॥१॥ प्रसादयितुमुद्युक्ता सीतां ते तुष्टुवुः सुराः॥ कृतांजलिपुटा देवाः प्रणम्य च पुनः पुनः॥२॥ ब्रह्माद्या
स्तोतुमारब्धा सीतां राक्षसनाशिनीं॥ या सा माहेश्वरी शक्तिर्ज्ञानरूपातिलालसा॥३॥ अनन्या निष्कलानंतत्वे संस्थिता रामव
ल्लभा॥ स्वाभाविकी च तन्मूला प्रभा भानोरिवामला॥४॥ एका सा वैष्णवी शक्ती रामो कौशिको गतः॥ परापरेण रूपेण क्रीडसे
रामसंनिधौ॥५॥ सेयं करोति सकलं तस्याः कार्यमिदं जगत्॥ न कार्यं नापि करणं ईश्वरस्येति निश्चयः॥६॥ चतस्रः शक्ते
यो देव्याः स्वरूपत्वेन संस्थिताः॥ अधिष्ठानवशादस्या जानक्या रामयोषितः॥७॥ शांतिर्विद्या प्रतिष्ठा च निवृत्तिश्चेति ताः स्मृ
ताः॥ चतुर्व्यूहस्ततो देवः प्रोच्यते परमेश्वरः॥८॥ अनया परया देवस्त्वात्मानंदं समश्नुते॥ चतुर्ष्वपि च देवेषु चतुर्मूर्तिर्महे
श्वरः॥९॥ अस्यास्त्वनादिसंसिद्धमैश्वर्यमतुलं भवेत्॥ त्वत्संबंधादनंताया रामेण परमात्मना॥१०॥ सैषा सर्वेश्वरी देवी स
र्वभूतप्रवर्तिका॥ त्वयेदं भ्रामयेदीशो मायावी पुरुषोत्तमः॥११॥ सैषा मायात्मिका शक्तिः सर्वाकारा सनातनी॥ वैश्वरूपं महेशस्य

से

॥३॥

सर्वदा संप्रकाशयेत् ॥१२॥ अन्याश्च शक्तयो मुख्यास्तया देव्या विनिर्मिताः ॥ ज्ञानशक्तिः क्रिया शक्तिः प्राणा इति त्रयम् ॥१३॥ सर्वासामे
व शक्तीनां शक्तिमंतो विनिर्मिताः ॥ एका शक्तिः शिवैकोपि शक्तिमानुच्यते शिवः ॥१४॥ अभेदो चानुपश्यंति योगिनस्तत्वचिंतकाः
॥ शक्तयो जानकी देवी शक्तिमंतो हि राघवः ॥१५॥ विशेषः कथ्यते यं च पुराणे वेदवादिभिः ॥ भोग्या विश्वेश्वरी देवी रघूत्तम पतिव्रता ॥
१६॥ प्रोच्यते भगवान्भोक्ता रघुवंशविवर्द्धनः ॥ मंत्रा रामो महातेजा मंतव्याच विचारतः ॥१७॥ एकं सर्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवम् ॥
योगिनस्तत्र पश्यंति तं देव्याः परमं पदम् ॥१८॥ अनंतमजरं ब्रह्म केवलं निष्कलं परम् ॥ योगिनस्तत्र पश्यंति तं देव्याः परमं पदं ॥
परात्परतरं तत्वं शांतं सर्वगतं महत् ॥ अनंतप्रकृतौ लीनं देव्यास्तं परमं परम् ॥२०॥ सा त्वं धात्री विधात्री च परमानंदमिच्छताम् ॥ सं
सारतापानखिलान्नृ विहंसीश्वरसंश्रया ॥२१॥ नेदानीं भूतसंहारात्त्वया कार्यं महेश्वरि ॥ रावणं सगणं हत्वा जगत्तां सुखमाहितं ॥
२२॥ किं पुनर्न्नृत्यकृत्वया जगत्संह्रियते भुवा ॥ एतच्छ्रुत्वा विशालाक्षी ब्रह्मणोन्मनयं वचः ॥२३॥ प्रीतासीना तदा प्राह ब्रह्माणं
सह दैवतम् ॥ पतिर्मे पुंडरीकाक्षः पुष्पको परिसंभ्रवा ॥२४॥ विद्धः क्षुरप्रेण हृद्देशे मृतकवत्प्रभुः ॥ तस्मिन्नेवं स्थिते देवाः कि
मिच्छामि जगद्धितम् ॥ नास्म मेकं करिष्यामि जगदेतच्चराचरम् ॥ श्रुत्वैतद्वचनं देव्याः संरंभसहितं सुराः ॥२६॥ हाहाकारं प्रचक्रु

सोमं च चालं च मेदिनी ॥ ततो भ्रातुरैः सार्द्धं पुष्पकं रथमास्थितम् ॥२७॥ श्रीरामं लंभयामास स्मृतिं स्वस्थ स्व पाणिना ॥ उत्तस्थौ
च महाबाहू रामः कमललोचनः ॥२८॥ रेरे राघव रादुष्ट त्वम् धमधारा मेदितः ॥ दृष्ट्वा सेत्वं यथाभावे भ्रुकुटीभीषणाकृतिः ॥२९॥
ब्रुवन्नेवं धनुर्दृष्ट्वा स्वस्थ पश्य त्रिदशान्प्रभुः ॥ नापश्यज्जानकीं तत्र प्राणेभ्योपि गरीयसीं ॥३०॥ नृत्यंतीं चापरां कालीमपश्यद्वर
णांगणे ॥ चतुर्भुजां लंलज्जिह्वां खड्गखर्परधारिणीम् ॥३१॥ शवरूप महादेव हृदि संस्थां दिगंबराम् ॥ श्रिवंतीं रुधिरं भीमां कोटराक्षी
क्षुधातुराम् ॥३२॥ जगत्त्रासकृतोत्साहां मुंडमालाविभूषणाम् ॥ भीमाकाराभिरन्याभिः क्रीडंतीं रणमूर्द्धनि ॥३३॥ मुंडै राक्षसरा
जस्य खेलंतीं कंदुकं मुदा ॥ मत्तयध्वांतधारा मांसदा बर्बर धारिणी ॥३४॥ श्रोत्रमुंडकरो दृष्टि कृत मालां चलत्पदाम् ॥ राक्ष
सानां कबंधानां मातृकाम हृन्नृत्यतः ॥३५॥ रथवाजिगजानां च सकलं गानि च्यलोकयत् ॥ नैको पिराक्षसं तत्र करपादशिरो मु
तः ॥३६॥ कबंधा येच नृत्यंति तेषां पादाः प्रतिष्ठिताः ॥ कबंधं राव धं रावणास्यापि नृत्यंतं च च्यलोकयत् ॥३७॥ ततः दृष्ट्वा
सुमहत्र्घोरं श्वेतराजपुरो धमम् ॥ कालीं चावीक्ष्य नृत्यंती मातृभिः सहितं द्विज ॥३८॥ पपात हस्ता द्रामस्य वेपतः सशरं धनुः ॥
भयाद्वैवैनिमिल्याशु रामः पद्मविलोचने ॥३९॥ इत्येवं विस्मितं दृष्ट्वा ब्रह्मलोकाचराचर भूतममम् ॥ तां दृष्ट्वा विहसंती तां तु र्द्दवा

पिरावरणाम्॥४०॥रथादवस्कं■द्य सीताय पातरणाम्बुदेति॥भीमां च मूर्तिमा॰तंग्यरोमकूपा च मानकाः॥४१॥रक्षसां नि

धनं कृत्वा नृत्यन्त्येवं व्यवस्थिताः॥अनया सहितो रामस्त्वजस्य वसिष्ठं सिंचा॥४२॥नोनया सहितो राम किंचित्कर्तु

म विक्षमः॥इति बोधयितुं सीतां चकारैतदवेदिताम्॥४३॥पश्येतां जानकीं राम त्वजभीतिं महाभुज॥निर्गुणां सगुणा

णां साक्षात्सदसद्व्यक्तिवर्जिताम्॥४४॥इत्येतदुहितावचोन्तःपोनिशंम्य श्रुतिमुखमात्मसहितं परामिमर्दी॥श्रुचम

त्वद्विजहो च किंचिद्देवजनकसुतामनुपश्य विस्मयी स्यात्॥४५॥इत्यार्षे रामा॰ वा॰ प्रा॰ अ॰ रामसमाश्वासनं नाम चतु

र्विंशतमः सर्गः॥२४॥ब्रह्मणो वचनं श्रुत्वा रामः कमललोचनः॥प्रोन्मील्य शनकैरक्ष्णी वेपमानो महाभुजः॥१

प्रणम्य शिरसा भूमौ तेजसा चापि विह्वलः॥भीतः कृतांजलिपुटः प्रोवाच परमेश्वरीम्॥२॥का त्वं देवि विशा॰नाक्षि शशां

कावयवां किं ते॥न जाने त्वां महादेवि यथावद्ब्रूहि पृच्छते॥३॥रामस्य वचनं श्रुत्वा ततः सा परमेश्वरी॥व्याजहार रघु

व्याघ्रं योगिनामाश्रयप्रदा॥४॥मां विद्धि परमां शक्तिं महेश्वरसमाश्रयाम्॥अनन्यामव्ययामेकां पश्यंति मुमुक्षवः॥ पां

५॥अहं हि सर्वभावानामात्मा सर्वांतराश्रिता॥शाश्वती सर्वविज्ञाना सर्वमूर्तिप्रवर्तिका॥६॥अनंतानंतमहिमा संसा

तार्णव नारिताः॥ दिव्यं ददामि ते चक्षुः पश्य मे पदमैश्वरं॥७॥ इत्युक्त्वा विरराम सीता रामो पश्यच्च तत्पदम्॥ कोटिसूर्य
प्रतीकाशं तेजो विश्वं निराकुलं॥ ज्वालामालासहस्राढ्यं कालानलशतोपमम्॥ दंष्ट्राकरालं दुर्द्धर्षं जटामंड
लमंडितम्॥ किरीटिनं गदाहस्तं नूपुरैरुपशोभितम्॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम्॥१०॥ ब्रह्मेंद्रोपेंद्र
योगींद्रैरीड्यमानं पदांबुजम्॥ सर्वतः पाणिपादांतं सर्वतोक्षिशिरोमुखम्॥११॥ सर्वमावृत्य तिष्ठंतं ददर्श परमेश्व
रं॥ दृष्ट्वा च तादृशं रूपं दिव्यं माहेश्वरं परं॥ भयेन च समाविष्टः स रामो हृतमानसः॥ आत्मन्याधाय चात्मानमों
कारं समनुस्मरन्॥१३॥ नाम्नामष्टसहस्रेण तुष्टाव परमेश्वरीम्॥ ॐ सीतोमा परमा शक्तिरनंता निष्कलामला॥
१४॥ शांता माहेश्वरी नित्या शाश्वता परमाक्षरा॥ अचिंत्या केवलानंता शिवात्मा परमात्मिका॥१५॥ अनादिरव्यया
शुद्धा देवात्मा सर्वगोचरा॥१६॥ एकानेकविभागस्था मायातीता सुनिर्मला॥१६॥ महामाहेश्वरी शक्तिर्महादेवी
निरंजना॥ काष्ठा सर्वांतरस्था च चिच्छक्तिरतिलालसा॥१७॥ जानकी मिथिलानंदा राक्षसांतविधायिनी॥ रावणांतक
री रम्या रामवक्षःस्थलालया॥१८॥ उमा सर्वात्मिका विद्या ज्योतिरूपा ह्यनाक्षरा॥ शांतिः प्रतिष्ठा सर्वेषां निवृत्ति

रम्ततप्रदा ॥१९॥ योमम्मूर्त्तिर्योमचरी योमाधाराच्युतानना ॥ अनादिनिधना योषा कारणात्माकलाकुला ॥२०॥ मंदर
प्रथमौजा ॥ गरम्नस्यां तसंश्रया ॥ प्राणेश्वरी प्रिया माता महामहिषमर्दिनी ॥२१॥ प्राणेश्वरी प्राणरूपा प्रधानपुरुषेश्व
री ॥ सर्वशक्तिः कला काष्ठा ज्योत्स्नेंदोर्महिमास्पदा ॥२२॥ सर्वकार्यनियंत्री च सर्वभूतेश्वरेश्वरी ॥ अनादिरव्यक्तगुणाम
हानंदा सनातनी ॥२३॥ आकाशयोनिर्योगस्था महायोगेश्वरेश्वरी ॥ महामाया सुदुःष्पूरा मूलप्रकृतिरीश्वरी ॥२४॥ सं
सारयोनिः सकला सर्वशक्तिसमुद्भवा ॥ संसारसारा दुर्वारा दुर्निरीक्षा दुरासदा ॥२५॥ प्राणशक्तिः प्राणविद्या योगिनी
परमा कला ॥ महाविभूतिर्दुर्द्धर्षा मूलप्रकृतिसंभवा ॥२६॥ अनाद्यानंतविभवा परात्मा पुरुषाकृती ॥ स्वर्गस्थित्यंतक
रिणी सुदुर्वाच्या दुरत्ययि ॥२७॥ शब्दयोनिः शब्दमयी नादाख्या नादविग्रहा ॥ प्रधानपुरुषातीता प्रधानपुरुषात्मिका
॥२८॥ पुराणा पुरुषा पुरस्यामौदिः पुरुषरूपिणी ॥ भूतांतरात्माकूटस्था महापुरुषसंज्ञिका ॥२९॥ जन्ममृत्युजरातीता
सर्वशक्तिसमन्विता ॥ व्यापिनी चानवच्छिन्ना मुक्तिमार्गप्रवेशिनी ॥३०॥ क्षेत्रज्ञाशक्तिरव्यक्तालक्षणा मलवर्जिता ॥
ति॰ अनादिमायासंभिन्ना निस्तत्वा प्रकृतिर्गुहा ॥३१॥ महामायासमुत्पन्ना तामसी पौरुषं ध्रुवा ॥ व्यक्ताव्यक्तात्मिका

भ.ना.४७॥

कुमारिका मुक्ता प्रसूतिका ॥३२॥ स्वकार्याकार्यजननी ब्रह्माणी ब्रह्मसंश्रया ॥ व्यक्ता प्रथमजा ब्राह्मी महती
ज्ञानरूपिणी ॥३३॥ वैराग्यैश्वर्यधर्मात्मा ब्रह्ममूर्तिर्हृदिस्थिता ॥ अपांयोनिः स्वयंभूतिर्मानसी तत्त्वसंभवा ॥३४॥
ईश्वराणी च सर्वाणी शंकरार्द्धशरीरिणी ॥ भवानी चैव रुद्राणी महालक्ष्मीरथांबिका ॥३५॥ महेश्वरी समुत्पन्ना मु
क्तिमुक्तिफलप्रदा ॥ सर्वेश्वरी सर्ववर्णा नित्यं मुदितमानसा ॥३६॥ ब्रह्मेंद्रोपेंद्रनमिता शंकरेच्छानुवर्तिनी ॥ ईश्वरा
र्द्धासनगता रघूत्तपतिव्रता ॥३७॥ सकृद्विभाविता सर्वा समुद्रपरिशोषिणी ॥ पार्वती हिमवत्पुत्री परमानंददायि
नी ॥३८॥ गुणाढ्या योगजा योग्या च ज्ञानमूर्तिर्विकाशिनी ॥ सावित्री कमला लक्ष्मीः श्रीरनंतोरसिस्थिता ॥३९॥
स्वाराजनिलया शुभा योगनिद्रा सुरार्दनी ॥ सरस्वती सर्वविद्या जगत्ज्येष्ठा सुमंगला ॥४०॥ वासवी वरदा वाच्या
कीर्तिः सर्वार्थसाधिका ॥ वागीश्वरी सर्वविद्या महाविद्या सुशोभना ॥४१॥ गुह्यविद्यात्मविद्या च सर्वविद्यात्मभा
विता ॥ स्वाहा विश्वंभरा सिद्धिः स्वधा मेधा धृतिः श्रुतिः ॥४२॥ नाभिः सुनाभिः सुकृतिर्माधवी नरवाहिनी ॥ पूज्या
विभावरी सौम्या भगिनी भोगदायिनी ॥४३॥ शोभा वंशकरी लीला मानिनी परमेष्ठिनी ॥ त्रैलोक्यसुंदरी रम्या सुंदरी का

मचारिणी॥४४॥महानुभावमध्यस्था महामहिषमर्द्दिनी॥पद्ममाला पापहरा विचित्रमुकुटानना॥४५॥कांताचि
त्रांबरधरा दिव्याभरणभूषिता॥हंसारूढा व्योमनिलया जगत्सृष्टिविवर्द्धिनी॥४६॥निर्यंत्रा मंत्रवाहस्था नंदि
नी भद्रकालिका॥आदित्यवर्णा कौंमयूरवरवाहिनी॥४७॥वृषासनगता गौरी महाकाली सुरार्चिता॥अदितिर्नियं
तारौद्री पद्मगर्भा विवाहना॥४८॥विरूपाक्षी लेलिहाना महापुरनिवासिनी॥महाफलानवद्यांगी काम्या पुन्या वि
भावरी॥४९॥विचित्ररत्नमुकुटा प्रणतर्द्धिविवर्द्धिनी॥कौशिकी कर्षिणी रात्रिस्त्रिदशार्त्तिविनाशिनी॥५०॥विरू
पा च सुरूपा च भीमा च मोक्षदायिनी॥भक्तार्त्तिनाशिनी भव्या भवभावविनाशिनी॥५१॥निर्गुणा नित्यविभवा नि
स्सारा निरपत्रपा॥यशस्विनी सामगीतिर्भवांगनिलयालया॥५२॥दीक्षा विद्याधरी दीप्ता महेंद्ररिपुपातिनी॥सर्व
तिशायिनी विद्या सर्वशक्तिप्रदायिनी॥५३॥सर्वेश्वरप्रिया तार्क्षी समुद्रांतरचारिणी॥अकलंका निराधारा नित्यसि
द्धा निरामया॥५४॥कामधेनुर्बृहद्गर्भा धीमती मोहनाशिनी॥निःसंकल्पा निरातंका विनया विजप्रदा॥५५॥ज्वाला
मालासहस्राढ्या देवदेवी मनोन्मनी॥महाभगवती भार्या वसुदेवसमुद्भवा॥५६॥महेंद्रोपेंद्रभगिनी भक्तिगम्या परा

परा॥ ज्ञानज्ञेया जरातीता वेदांतविषयागतिः॥ ८७॥ दक्षिणा दहना बाह्या सर्वभूतनमस्कृता॥ योगमायाविभावज्ञा महा
मोहा महीयसी॥ ८८॥ सत्या सर्वसमुद्भूतिर्वृक्षरक्षाश्रयानतिः॥ बीजांकुरसमुद्भूतिर्महाशक्तिर्महामतिः॥ ८९॥ ख्यातिः
प्रतिज्ञा चित्संवित् महाभोगेंद्रशायिनी॥ विकृतिः शांकरी शास्त्री गंधर्वपरिसेविता॥ ९०॥ वैश्वानरी महाज्वाला देवसे
ना गुहप्रिया॥ महारात्रिः शिवानंदा शची दुःस्वप्ननाशिनी॥ पूज्या पूज्या जगद्धात्री दुर्विज्ञेयस्वरूपिणी॥ गुहांबिका
गुहोत्पत्तिर्महापीठ मरुत्सुता॥ ९१॥ हव्यवाहांतरागार्गी हव्यवाहसमुद्भवा॥ जगद्योनिर्जगन्माता जन्ममृत्युजराति
गा॥ ९२॥ बुद्धिर्माता बुद्धिमती पुरुषांतरवासिनी॥ तपस्विनी समाधिस्था त्रिनेत्रा दिवि संस्थिता॥ ९३॥ सर्वेंद्रि
यमनोमुक्ता सर्वभूतहृदि स्थिता॥ संसारतारिणी विद्या ब्रह्मविद्यौ मनोलया॥ ९४॥ ब्रह्माणी बृहती ब्राह्मी ब्रह्म
भूता भवारणिः॥ हिरण्मयी महारात्रिः संसारपरिवर्तिका॥ सुमालिनी सुरूपा च तारिणी भाविनी प्रभा॥ उन्मीलिनी स
र्वसहा सर्वप्रत्ययसाक्षिणी॥ ९६॥ सुसौम्या चंद्रवदना तांडवासक्तमानसा॥ सत्वशुद्धिकरी शुद्धिर्मलत्रयविनाशि
नी॥ ९७॥ जगत्प्रिया जगन्मूर्तिस्त्रिमूर्तिरमृताश्रया॥ निराश्रया निराहारा निरंकुररणोद्भवा॥ ९८॥ चक्रहस्ता वि

पी

३१

पिंगांस्रग्विनी पद्मधारिणी ॥ परापरविधानज्ञा महापुरुषपूर्वजा ॥७०॥ विद्येश्वरीप्रिया विद्या विद्युज्जि
ह्वा जितश्रमा ॥ विद्यामयी सहस्राक्षी सहस्रश्रवणात्मजा ॥७१॥ सहस्ररश्मिसत्पद्मस्था महेश्वरपदाश्र
या ॥ ज्वालिनी सद्मनाथा स्थातेजसी पद्मरोचका ॥७२॥ महामायाश्रया माया महादेवमनोरमा ॥
व्योमलक्ष्मी सिंहरथा चेकिताना मितप्रभा ॥७३॥ विश्वेश्वरी विमानस्था विशोका शोकनाशिनी ॥ अ
नाहता कुंडलिनी पद्मवासिनी ॥७४॥ सनानंदा सती कीर्तिः सर्वभूताशयस्थिता ॥ वाग्देवता ब्रह्मक
लाकलातीता कलावती ॥७५॥ ब्रह्मर्षिर्ब्रह्महृदया ब्रह्मविष्णुशिवप्रजा ॥ व्योमशक्तिः क्रियाश
क्तिः जनशक्तिः परागतिः ॥७६॥ क्षोभका बंधिका भेद्या भेदाभेदविवर्जिता ॥ अभिन्नाभिन्नसं
स्थाना वंशिनी वंशहारिणी ॥७७॥ गुह्यशक्तिर्गुणातीता सर्वदा सर्वतोमुखी ॥ भगिनी भगवत्पत्नी स
कला कालकारिणी ॥७८॥ सर्ववित्सर्वतोभद्रा गुह्यातीता गुहावलिः ॥ प्रक्रिया योगमाता च गंगा वि
श्वेश्वरेश्वरी ॥७९॥ कपिला कपिलाकांता कनकाभा कलांतरा ॥ पुण्या पुष्करिणी भोक्त्री पुरंद

पनलिनी

ग्र.४२

रपुरःसदा॥८०॥ योगिनी परमैश्वर्यभूतिदा भूरिभूषणा॥ पंचब्रह्मसमुत्पत्ति परमात्मात्मविग्रहा॥८१
नर्मदपा भानुमती योगिज्ञेया मनोजवा॥ मनोहरी मनोरक्षी तापसी वेदरूपिणी॥८२॥ वेदशक्ति
र्वेदमाता वेदविद्याप्रकाशिनी॥ योगेश्वरेश्वरी माला महाशक्तिर्मनोमयी॥८३॥ विश्ववंद्या वीरमु
क्तिर्विद्युन्माला विहायसी॥ खेचरी सुरभिर्वंद्या नंदिनी नंदिवल्लभा॥८४॥ भारती परमानंदा परा

के४

परविभेदिका॥ सर्वप्रहरणोपेता काम्या कामेश्वरेश्वरी॥८५॥ अचिंत्याविभया हिल्लेखा क
नकप्रभा॥ कूष्मांडी धनरत्नाद्या सुगंधा गंधदायिनी॥८६॥ त्रिविक्रमपदोद्भूता धनुःपाणिः शरोद
पा॥ सुदुर्लभा धनाध्यक्षा धन्या पिंगललोचना॥८७॥ भ्रांतिः प्रभावती दीप्तिः पंकजायतलोच
ना॥ आद्या हृत्कमलोद्भूता परमा मा रमा प्रिया॥८८॥ सत्क्रिया गिरिजा शुद्धा नित्यशुद्धा निरंतरा॥
दर्शी कात्यायिनी चंडी चर्चिका शांतिविग्रहा॥८९॥ हिरण्यवर्णा रजनी जगन्मंत्रप्रवर्तिका॥ मंद

घ्मा२

राद्रिनिवासा च शारदा स्वर्णमालिनी ॥ ९१ ॥ रत्नमाला रत्नगर्भा पृथ्वी विश्वप्रमाथिनी ॥ पद्मासना पद्म
निभा नित्यतुष्टामृतोद्भवा ॥ ९२ ॥ धुन्वती दुःप्रकंपा च सूर्यमाता दृषद्वती ॥ महेंद्रभगिनी माया वरम
ण्या वरदर्पिता ॥ कल्याणी कमला रामा पंचभूता वरप्रदा ॥ वाच्या वरेश्वरी वंद्या दुर्जया दुरतिक्रमा ॥
९३ ॥ कालरात्रिर्महावेगा वीरभद्रप्रिया हिता ॥ भद्रकाली जगन्माता भक्तानां भद्रदायिनी ॥ ९४ ॥
करालापिंगलाकारा नामवेदा महानदा ॥ तपस्विनी यशोदा च यथाध्वपरिवर्तिनी ॥ ९५ ॥ शंखिनी पद्मि
नी संख्या सांख्ययोगप्रवर्तिका ॥ चैत्री संवत्सरारूढा जगत्संपूरणी ध्वजा ॥ ९६ ॥ शुंभारिः खेचरी स्वस्था
कंबुग्रीवा कलिप्रिया ॥ खरध्वजा खरारूढा परार्घ्या परमालिनी ॥ ९७ ॥ ऐश्वर्यरत्ननिलया विरक्ता ग
रुडासना ॥ जयंती त्रिगुणा न्हिरम्या सत्वगुणाग्रणीः ॥ ९८ ॥ संकल्पसिद्धा साम्यस्था सर्वविज्ञानदायि
नी ॥ कलिकल्मषहंत्री च गुह्योपनिषदुत्तमा ॥ ९९ ॥ नित्यदृष्टिः स्मृतिर्व्याप्तिः पुष्टिस्तुष्टिः क्रियाव
ती ॥ विश्वामाहेश्वरीशानां भुक्तिर्मुक्तिः शिवामृता ॥ १०० ॥ लोहिता सर्वमाता च भीषणा वरमालिनी

श्री.ग.४४

अनंतशयनानाख्या नरनारायणोद्भवा ॥१॥ नृसिंही दैत्यमथिनी शंखचक्रगदाधरा ॥ संकर्षणसमुद्भूतिरं
बिकापानसंश्रया ॥२॥ महाज्वाला महामूर्त्तिः सुमूर्त्तिः सर्वकामधुक् ॥ सुप्रभा सुस्तना गौरी धर्मकामा
र्थमोक्षदा ॥३॥ भ्रूमध्यनिलया पूर्वा प्रधानपुरुषावली ॥ महाविभूतिदा मध्या सरोजनयनासना
॥४॥ अष्टादशभुजा नाद्या नीलोत्पलदलप्रभा ॥ सर्वशक्तीसमारूढा धर्माधर्मानुवर्त्तिना ॥५॥
वैराग्यज्ञाननिरता निरालोका निरिन्द्रिया ॥ विचित्रा गहना धीरा शाश्वतस्थानवासिनी ॥६॥ स्थाने
श्वरी निरानंदा त्रिशूलवरधारिणी ॥ अशेषदेवतामूर्त्तिर्देवता वरदेवता ॥७॥ गणाम्बिका गिरेःपुत्री
निशुंभविनिपातिनी ॥ अवर्णा वर्णरहिता निर्वर्णा बीजसंभवा ॥८॥ अनंतवर्णा नित्यस्था संचरी
शांतमानसा ॥ अगोत्रा गोमती गोप्त्री गुह्यरूपा गुणोत्तरा ॥९॥ गौः श्रीर्गव्यप्रिया गौणी गणेश्वरनम
स्कृता ॥ सत्यमात्रा सत्यसंधा त्रिसंध्या संधिवर्जिता ॥१०॥ सर्ववादाश्रया सांख्या सांख्ययोगसमुद्भवा

89

असंख्येयाप्रमेयाख्या शून्या शुद्धकुलोद्भवा ॥११॥ बिंदुनादसमुत्पत्तिस्तमःपारे प्रतिष्ठिता ॥ जितत्वमाता त्रिविधा
सुसूक्ष्मपदसंश्रया ॥१२॥ शांत्यातीता मलातीता निर्विकारा निराश्रया ॥ शिवाख्या चित्रनिलया शिवज्ञानस्
स्वरूपिणी ॥१३॥ दैत्यदानवनिर्मात्री शास्त्रयोनिश्च काश्यपी ॥ क्रियामूर्त्तिर्द्धर्ममूर्त्तिश्चतुर्वर्गप्रदर्शिता ॥१४॥
नारायणी नवोद्भूती कौमुदी लिंगधारिणी ॥ कामुकी ललिता तारा परापरविभूतिदा ॥१५॥ परांतजातमहिमा
बडवा मललोचना ॥ सुभद्रा देवकी सीता वेदवेदांगपारगा ॥१६॥ मनस्विन्यच्युता माता महान्युसमुद्भवा ॥
अमृत्युर्वामृता स्वाहा पुरुहूता पुरष्टुता ॥१७॥ अशोच्या मित्रविषया हिरण्यरजतप्रिया ॥ हिरण्यराजती हैमी
हेमाभरणभूषिता ॥१८॥ विभ्राजमाना दुर्ज्ञेया ज्योतिष्टोमफलप्रदा ॥ महानिद्रासमुद्भूतिरनिद्रा सत्यदेवता
॥१९॥ दीर्घा ककुद्मिनी हृद्या शांतिदा शांतिवर्द्धिनी ॥ लक्ष्म्यादिशक्तिजननी शक्तिचक्रप्रवर्तिका ॥२०॥
त्रिशक्तिजननी जन्या षडूर्मिपरिवर्जिता ॥ स्वधा च कर्मकरणी युगांतदलनात्मिका ॥२१॥ संकर्षणा जगद्धा
त्री कामयोनिः किरीटिनी ॥ ऐंद्री त्रैलोक्यनमिता वैष्णवी परमेश्वरी ॥२२॥ प्रद्युम्नदयिता दांता युग्मदृष्टिस्त्रिलोच

ना॥ मदोत्कटा हंसगतिः प्रचंडा चंडविक्रमा॥२३॥ स्वावेशा विंध्यमात्रा विंध्यपर्वतवासिनी॥ हिमवन्मेरु
निलया कैलाशगिरिवासिनी॥२४॥ चाणूरहंत्री तनयानीतिज्ञा कामरूपिणी॥ वेदविद्याव्रतस्नाता धर्मशी
लाऽनिलाशना॥२५॥ अयोध्यानिलया वीरा महाकालसमुद्भवा॥ विद्याधरप्रिया सिद्धा विद्याधरनिराकृती
॥२६॥ आप्यायंती वहंती च पावनी पोषिणी खिला॥ मातृका मन्मथोद्भूता वारिजा वाहनप्रिया॥२७॥ करीषि
णी स्वधा वीणा वीणावादनतत्परा॥ सेविता सेवना सेवा सिनी वाली गरुत्मती॥२८॥ अरुंधती हिरण्याक्षी
मणिदा श्रीवसुप्रदा॥ वसुमती वसोर्धारा वसुंधरसमुद्भवा॥२९॥ वरारोहा वरार्हा च वपुः संगसमुद्भवा॥ श्री
फली श्रीमती श्रीशा श्रीनिद्रा साहरिप्रिया॥३०॥ श्रीधरी श्रीकरी कंपा श्रीधरा ईशवीरिणी॥ अनंतदृष्टि
रक्षुद्रा धात्रीशा धनदप्रिया॥३१॥ निहंत्री दैत्यसिंहानां सिंहिका सिंहवाहिनी॥ सुसेना चंद्रनिलया सुकीर्ति
श्छिन्नसंशया॥३२॥ बलज्ञा बलदा वामा लेलिहानामृतश्रवा॥ नित्योदिता स्वयंज्योतिरुत्सुका मृतजीविनी॥३३

वज्रदंष्ट्रा वज्रजिह्वा वैदेही वज्रविग्रहा ॥ मंगल्या मंगला माला ऽमलिना मनहारिणी ॥३४॥ गंधर्वी गरुडी चांद्री
कंबला श्वतरप्रिया ॥ सौदामिनी जनानंदा भ्रुकुटीकुटिलानना ॥३५॥ कर्णिकारकराकक्षा कंसप्राणापहा
रिणी ॥ युगंधरा युगावर्ती त्रिसंध्या हर्षवर्द्धिनी ॥३६॥ प्रत्यक्षदेवता दिव्या दिव्यगंधा दिगंबरा ॥ शक्रासनगता
शाक्री साध्वी नारी सवासना ॥३७॥ इष्टा विशिष्टा शिष्टेष्टा शिष्टाशिष्टप्रपूजिता ॥ शतरूपा शतावर्ती विनिता सु
रभी सुता ॥३८॥ सुरेंद्रमाता सुद्युम्ना सुषुम्ना सूर्यसंस्थिता ॥ समीक्षा सत्प्रतिष्ठा च निवृत्तिर्ज्ञानपारगा ॥३९॥ धर्म
शास्त्रार्थकुशला धर्मज्ञा धर्मवाहना ॥ धर्माधर्मविनिर्मात्री धार्मिकानां शिवप्रदा ॥४०॥ धर्मशक्तिर्धर्ममयी वि
धर्मा विश्वधर्मिणी ॥ धर्मांतरा धर्ममेधा धर्मपूर्वा धनप्रिया ॥४१॥ धर्मोपदेष्ट्री धर्मात्मा धर्मगम्या धराधरा ॥ क
पालीशाकला मूर्तिः कला कलितविग्रहा ॥४२॥ सर्वशक्तिविनिर्मुक्ता सर्वशक्त्याश्रयाश्रया ॥ सर्वा सर्वेश्वरी सू
क्ष्मा सूक्ष्मज्ञानस्वरूपिणी ॥४३॥ प्रधानपुरुषेशाना महापुरुषसाक्षिणी ॥ सदाशिवा वियन्मूर्तिर्वसुमूर्तिस्सुरमूर्तिका
॥४४॥ एवं नाम्नां सहस्रेण तुष्टाव रघुनंदनः ॥ कृतांजलिपुटो भूत्वा सीतां हृष्टतनूरुहः ॥४५॥ भरद्वाज म

अ.रा.४६

लभागपवनत्स्तोत्रमुत्तमम्॥४५॥ पठेद्वा पाठयेद्वापि स याति परमं पदम्॥४६॥ ब्रह्मक्षत्रियविड्याति ब्रह्मप्रा
प्नोति शाश्वतम्॥ शूद्रः सद्गतिमाप्नोति धनधान्यविभूतयः॥४७॥ भवंति स्तोत्रमाहात्म्यात्परं स्वस्त्ययनं मह
त्॥ मारीभये राजभये तथा चौराग्निजे भये॥४८॥ व्याधिनां प्रभवे तीव्रे शत्रुत्थाने च संकटे॥ अनावृ
ष्टिभये विप्र सर्वशांतिकरं परं॥४९॥ यद्यदिष्टतमं यस्य तत्तत्सर्वं स्तोत्रतो भवेत्॥ यत्रैतत्पठ्यते सम्यक्
सीतानामसहस्रकम्॥५०॥ रामेण सहिता देवी तत्र तिष्ठत्यसंशयम्॥ महापापातिपापानि विलयं यां
ति सुव्रत॥५१॥ इत्यार्षे रा॰ वा॰ आ॰ अ॰ सीतासहस्रनामस्तोत्रं पंचविंशतिः सर्गः॥२५॥ एवं नामसहस्रेण
स्तुत्वासौ रघुनंदनः॥ भूयः प्रणाम्य सीतां तां प्रोवाचेदं कृतांजलिः॥१॥ यदेतदैश्वरं रूपं घोरं ते परमेश्व
रि॥ भीतोऽस्मि सांप्रतं दृष्ट्वा रूपमन्यं प्रदर्शय॥२॥ एवमुक्ता तदा देवी तेन रामेण मैथिली॥ संहृत्य दर्शया
मास स्वरूपं परमं पुनः॥३॥ कांचनाभं सुरूपं स्वं पद्मोत्पलसुगंधिकम्॥ सुनेत्रं द्विभुजं सौम्यं नीलाल

४

93

कविभूषितम्॥४॥रक्तपादांबुजनतं सुरक्तकरपल्लवम्॥श्रीमद्दिशानसंवर्तनजनारतिनकोज्ज्वलम्॥५॥विभू
षितं चारुसर्वांगंभूषणैरतिकोमलम्॥दधानमुरसामालां विशालां हेमनिर्मिताम्॥६॥ईषत्स्मितं सुबिंबोष्ठं
नूपुरावरसंयुतम्॥प्रसन्नवदनं दिव्यमनंतमहिमास्पदम्॥७॥तदीदृशं समालोक्य रूपं रुद्रात्मजोत्तमः॥भीतिं
संत्यज्य हृष्टात्मा वभाषे परमेश्वरीम्॥८॥अद्य मे सफलं जन्म अद्य मे सफलं तपः॥यन्मे साक्षात्त्वमव्यक्ता
प्रसन्ना दृष्टिगोचरा॥९॥त्वया सृष्टं जगत्सर्वं प्रधानाद्यं त्वयि स्थितम्॥त्वय्येव लीयते देवि त्वय्येव च परा गतिः॥
१०॥वदंति केचित्त्वामेव प्रकृतिं विकृतेः परम्॥अपरे परमार्थज्ञाः शिवेति शिवसंश्रया॥११॥त्वयि प्रधानं
पुरुषो महत्तत्त्वं ब्रह्मा तथेश्वरः॥अविद्या नियतिर्माया कलाद्याः शतशोभवन्॥१२॥त्वं हि सा परमा शक्तिरनंता
परमेष्ठिनी॥सर्वभेदविनिर्मुक्ता सर्वभेदानिजाश्रया॥१३॥त्वामधिष्ठाय योगीशि पुरुषः परमेश्वरि॥प्रधाना
द्यं जगत्कृत्स्नं करोति विकरोति च॥१४॥त्वयैव संगतो देवः स्वमानंदं समश्नुते॥त्वमेव परमानंदस्त्वमेवानंददायिनी

श्र.ग.४७

॥१५॥ त्वमेव परमं व्योम महज्ज्योतिर्निरंजनं ॥ शिवं सर्वगतं सूक्ष्मं परं ब्रह्म सनातनम् ॥१६॥ त्वं शक्रः सर्वदे
वानां ब्रह्मा ब्रह्मविदामसि ॥ वायुर्बलवतां देवी कुमारो योगिनामसि ॥१७॥ ऋषीणां च वसिष्ठस्त्वगमश्वाप
हृतामसि ॥ सांख्यानां कपिलो देवो रुद्राणामसि शंकरः ॥१८॥ आदित्यानामुपेंद्रस्त्वं वसूनां चैव पावकः ॥ वेदा
नां सामवेदस्त्वं गायत्री छंदसामपि ॥१९॥ अध्यात्मविद्या विद्यानां गतीनां परमा गतिः ॥ माया त्वं सर्वश
क्तीनां कालः कलयतामसि ॥२०॥ ॐकारः सर्वगुह्यानां वर्णानां च द्विजोत्तमः ॥ आश्रमाणां गृहस्थस्त्वं मी
श्वराणां महेश्वरः ॥२१॥ पुंसां त्वमेकः पुरुषः सर्वभूतहिते स्थितः ॥ सर्वोपनिषदां देवी गुह्योपनिषदुच्यते ॥२२
ईशानश्चासि कल्पानां युगानां कृतमेव च ॥ आदित्यः सर्वमार्गाणां वाचां देवी सरस्वती ॥२३॥ त्वं लक्ष्मीश्चा
रुरूपाणां विष्णुर्मायाविनामपि ॥ अरुंधती सतीनां त्वं सुपर्णः पततामपि ॥२४॥ सूक्तानां पौरुषं सूक्तं ज्येष्ठं साम
च सामसु ॥ सावित्री चासि जप्यानां यजुषां शतरुद्रियम् ॥२५॥ पर्वतानां महामेरुरनंतो भोगिनामसि ॥ स

रू१४

वेषां त्वं परब्रह्मतत्त्वमयं सर्व एव हि ॥२६॥ रूपं न यस्याशेषकलाविहीनमगोचरं निर्मलमेकरूपम् ॥ अनादिमध्यांतमनंतमा
द्यं नमामि सत्यं तमसः परस्तात् ॥२७॥ यदेव पश्यंति जगत्प्रसूतिं वेदांतविज्ञानविनिश्चितार्थाः ॥ आनंदमात्रं परमाभिधानं तं देव
रूपं प्रणतोस्मि नित्यम् ॥२८॥ अशेषतत्त्वानि नरस्तं निविष्टं प्रधानसंयोगवियोगहेतुम् ॥ तेजोमयं जन्मविनाशहीनं हीनं प्राणाभिधानं
प्रणतोस्मि नित्यम् ॥२९॥ आद्यंतहीनं जगदात्मरूपं विभिन्नसंस्थं प्रकृतेः परस्तात् ॥ कूटस्थमव्यक्तवपुस्तथैव नमामि रूपं
पुरुषाभिधानम् ॥३०॥ सर्वाश्रयं सर्वजगद्विधानं सर्वत्रगं जन्मविनाशहीनम् ॥ नतोस्मि ते रूपमनुप्रभेदं आद्यं महत्त्वे पुरु
षानुरूपम् ॥३१॥ प्रकृत्यवस्थं त्रिगुणात्मबीजमैश्वर्यविज्ञानविरागधर्मैः ॥ समन्वितं देव नतोस्मि रूपं द्विसप्तलोकात्मकमम्बुसं
स्थम् ॥३२॥ विचित्रभेदं पुरुषैकनाथमनामतैव विधिवासितं ते ॥ नमोस्मि रूपं जगदंडसंज्ञमशेषवेदात्मकमेकमाद्यम् ॥३३॥
स्वतेजसापूरितनेकभेदं नमामि रूपं रविमंडलस्थम् ॥ सहस्रमूर्धानमनंतशक्तिं सहस्रबाहुं पुरुषं पुराणम् ॥३४॥ शयान
मंतःसलिले तथैव नारायणाख्यं प्रणतोस्मि रूपम् ॥ दंष्ट्राकरालं त्रिदशाभिवंद्यं युगांतकालानलकल्परूपम् ॥३५॥ अशेष
भूतांडविनाशहेतुं नमामि रूपं शिवकालसंज्ञम् ॥ फणासहस्रेण विराजमानं भोगींद्रमुख्यैरभिपूज्यमानम् ॥३६॥ जनार्द

नारूढनंतं प्रभुं प्रनतोऽस्मि रूपं न वक्षोवसंलक्ष्मम्॥ अथाहते श्वर्यमयुग्मनेत्रं ब्रह्मामृतानंदरसज्ञमेकम्॥३७॥ अगुणांत
शेषं दिविनृत्यमानं नतोऽस्मि रूपं नवरुद्रसंख्यम्॥ प्रहीनशोकं विमलं पवित्रं सुरासुरैरर्चितपादयुग्मम्॥३८॥ सु
कोमलं नंदे विविशात्र्मत्स्युं नमामि ते रूपमिदं नमामि॥३९॥ एतावदुक्त्वा वचनं रघुराजकुलोद्वहः॥ संप्रेक्ष्यमाणो वैदेहीं प्रां
जलिः पार्श्वतो भवत्॥ अथ स्मातस्य वचनं निशम्य जगतो वशेः॥४०॥ सस्मितं प्राह भर्तारं शृणुष्व वचनं मम॥४१
हीतं यन्मया रूपं राघवराजवधाय वै॥४२॥ तेन रूपेण राजेंद्र वसामि मानसोत्तरे॥ प्रकृत्या नीलरूपस्त्वं लोहितो रा
वणार्दितः॥ नीललोहितरूपेण त्वया सह वसाम्यहम्॥४३॥ हारा च वरं राम मनो यद्भिलाषितम्॥ तच्छ्रुत्वा राघवो वी
रः प्रतिश्रुत्य गिरो स्थितिं निर्मम्॥४४॥ भरद्वाजमतंगयायाचे पर मं वरम्॥ देवि सीते महाभागे दर्शितं रूप मे श्वरम्॥४४

भा३

हृदयांतर्न्नापगच्छे दिति मेदीयतां वरम्॥ भ्रातरो मम कल्याणि वानराः सविभीषणाः॥४५॥ ये नान्यो मम वैदेहि
श्रयो ध्यां योधमुख्यकाः॥ ७ उनस्तो संगतास्ते तु मया रावणात र्जिताः॥४६॥ ९ तस्मिन्नंतरे चाभूदाकाशे दुंदुभिः

स्वनः॥ पश्चात्पुष्पकस्थश्च रामः सीतोपरि द्विज॥४७॥ महस्य सीता पुनराहरामं तथेति रामो विविरंचिमुख्यान्॥ पुन
र्विसृज्याथ प्रययौ सीतां गंतुं स्वकं देशमसाविपेश्च॥४८॥ इत्यार्षे रा॰ वा॰ आ॰ अ॰ श्रीसीतारामविजयो नाम सर्ग
र्गः॥२८॥ रामस्तु पुष्पकारूढः सीतामालिंग्य बाहुना॥ अयोध्यामगमद्वीरः काकुत्स्थकुलनंदनः॥१॥ रथनेमिस्व
नं श्रुत्वा रामदर्शनलालसाः॥ आनरो भरताद्यास्ते योधमुख्याश्च ते तथा॥२॥ राममागतमाज्ञाय सीतां संत्रस्तविग्र
जम्॥ प्रणेमुः सहसागत्य आनंदाश्रुकणाकुलाः॥३॥ वानरान्राक्षसान्सर्वान्नानाप्यस्त्वपुरं हितः॥ सर्वं तेतत्क
थयामास रामः कमललोचनः॥४॥ तच्छ्रुत्वा विस्मिताः सर्वे साधु साध्वीति वादिनः॥ सीतां तत्त्वेन विज्ञाय रामं च
मधुसूदनम्॥५॥ तदेव चिंतयंतस्ते स्वस्वस्थानं ययुर्मुदा॥ वसिष्ठो रामभद्रे ऽसौ तत्त्व पूर्वं महात्मना॥६॥ अभय
श्चाभिनंद्यैनं ससीतां रघुनंदनम्॥ आशीर्भिश्छंदयामासुः पपुश्चापि यथागतम्॥७॥ रामोपि सीतया सार्द्धं भ्रा
तृभिश्च महात्मभिः॥ चक्रे निष्कंटकां पृथ्वीं देवानां च महर्द्धितम्॥८॥ यज्ञान्बहुविधांश्चक्रे सरयूतीर उत्तमे॥ दशाव
र्षसहस्राणि दशवर्षशतानि च॥९॥ किंचिदभ्यधिकं चैव रामो राज्यमकारयत्॥ देव किंनर गंधर्व विद्याधर महोरगाः

अ॰रा॰४९

पं२

॥१०॥ रामं नमंतिसततं गुणारामं रमापतिम्॥ एतत्तेकथितं भद्र भरद्वाज महामते॥११॥ शतकोटिप्रविस्तारे रामाय
णमहाकवि॥ वहुव्याश्चैभूतानि तन्त्रोक्तानि महामते॥१२॥ तेषु किंचिदिहाश्चर्यमुक्तं रामकथाश्रयम्॥ सर्वं नव
कुमिश्रामि पुनः किमपोहि॥१३॥ ब्रह्मणा गोपितं तच्च श्रीतोपि न तदुक्तवान्॥ अद्भुतोत्तरकांडं ते कथितं वेदसं
नाम्॥१४॥ श्रृणोत्यधीते यश्चैतत्स ब्रह्म पदमाप्नुयात्॥ श्लोकमेकां तदर्द्धं वा शृणुयाद्यश्च मानवः॥१५॥ प्रा
नर्मध्यान्ह योगे वा स यातिपरमां गतिम्॥ पंचविंशति साहस्त्रं रामायणमधीयते॥१६॥ फलमाप्नोति पुरुष
स्तदस्य श्लोकमात्रतः॥ न श्रुतं नाप्यधीतं वा येनाद्भुतमिदं द्विज॥१७॥ स गर्भान्निःसृतो नैव यथा भूतस्तथैव सः
॥ रामायणमिदं श्रुत्वा न मातुर्जठरे विशेत्॥१८॥ वेदाश्चत्वारएकत्र तुलया वेदमेकतः॥ विधात्रा तुलितं शास्त्रं सर्वं
देवान्वितो द्विज॥१९॥ इदं तु सर्ववेदेभ्यो गौरवादतिरिच्यते॥ शक्रायस्वर्नदीतीरे पुरा पृष्टोहमब्रुवन्॥२०॥ तदे
व तव चाख्यातमद्भुतोत्तरकांडकम्॥ रामायणमहारत्नं ब्रह्महृत्क्षीरधारभृत्॥२१॥ नारदात्तः समासाद्य क्रमान्म

४९

99

महदिस्थितम्॥ तत्सर्वं ब्रह्मणो लोके निःशेषमवतिष्ठते॥२३॥ किंचित्तुर्यं च पाताले त्रिदिवे शक्रसन्निधौ॥
विरंचिर्नारदोहं च चत्वार एवास्य पारगाः॥२४॥ चतुर्थोपि पद्ये तत्तु ध्येदं सुस्थिरो भव॥ पदुक्रमं तु ते कांडे उक्त
ते कथयाम्यहम्॥२५॥ श्रीरामजन्मवृत्तांतं श्रीमती चरितं महत्॥ दंडकारण्यकस्यानां शोधिता तेन महात्मना
मूः॥ नारदस्य च शापेन लक्ष्म्याश्चैव पराधमः॥ मंदोदरीगर्भस्मिद्यां देहे देही जन्म चोक्तवान्॥२७॥ रा
मस्य विश्वरूपं च भार्गवेन च वीक्षितम्॥ सख्यं मूके हनुमता चतुर्वीहुरवृतमः॥ इशो भिक्षुस्वरूपे
ण उक्ती वसरव्यमुक्तवान्॥ लक्ष्मणांगजना पेशौ शोषितां वारिधेउनः॥२९॥ भ्रातृराज्यस्य रामस्य मु
नीनां सन्निधौ तथा॥ सीतायाः कथनं श्रुत्वा महत्त्रास्य स्यराक्षसः॥३०॥ मानसोत्तरशैलेंद्रे
स्थितं ज्ञात्वा रघूत्तम द्वहः॥ जगाम पुष्करद्वीपं भ्रातृभिः सहवानरैः॥ सी तोपारेश्वरं रूपं रावणा
स्य वधस्तथा॥ अयोध्यागमनं रामस्यैष वृत्तांतसंग्रहः॥३२॥ वृत्तांतसंग्रहं चापि पठित्वा रामभ

अ॰रा॰ ५०

क्षिमान्॥ जायते सुनिशार्दूल नात्र कार्य्या विचारणा॥ २३॥ पठित्वयो राम चरित्रमेनं तच्छृणोति पापात्स मुक्तं भवेत्॥ तीर्थाभिषेकं समरे जयं च सर्वस्य यज्ञस्य महत्फलं च॥ २४॥ भजेनयो राम मचिन्त्य रूपं मेके न भावेन च भूमि पुत्री मूनिः नरस्सु पुण्यं शृणुयात्पठे द्वा भूयो मैन्नो जठरे जनन्याः॥ २५॥ ॥ इत्यार्षे रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकाण्डे श्रीसीता रामायोध्यागमनं अनुक्रमन कथनं नाम सप्तविंशतितमः सर्गः संपूर्णम्॥ शुभमस्तु॥ श्रीरस्तु॥ संवत्॥ १८५५ भाद्र कृष्ण नवम्यां त्रि॰ गोचने नेद [illegible]

ग.१०.५२

मलिखत्॥ श्रीः॥ नंदिनी नलिनी सीता मालती च मलापहा॥ विष्णुपादाब्जसंभूता गंगा
त्रिपथगामिनी॥१॥ भागीरथी भोगवती जान्हवी त्रिदशेश्वरी॥ द्वादशैतानि नामानि
यत्र यत्र जलाशये॥२॥ स्नानकाले पठेन्नित्यं यत्र संनिहिता निताः॥ नर्मदामाहात्म्ये
द्वादशनामानि॥ शुभमस्तु लेखकपाठकयोः॥ श्रीसीताराचंद्राभ्यां नमः॥ ॥ ॥
यास्वर्गे च हृदश्च नाकुरयतेरग्नेसदापद्यते पाताले पि चकं वलास्य चैतरतः शेषेणायाश्रूयते॥ मध्ये च दरी
वने व्रतिर्दीनंस्तेन याकथ्यते सैषा उन्यतमा यथा मतिकथा शीत्या मयाकथ्यते॥ ये देवाः संति मेरौ हिमगिरि
शिखरे मंदरे ये च यक्षाः पाताले ये भुजंगा निजफणिमणिभिर्ध्वस्तसर्वांधकाराः॥ कैलासे श्रीनिवासे
प्रमुदितहृदया ये च विद्याधराद्यास्ते सर्वे मोक्षमंतं मुनिवरवचनं श्रोतुमायांतु सर्वे॥१॥

५

(१०३)

[OrderDescription]
,CREATED=30.09.20 11:28
,TRANSFERRED=2020/09/30 at 11:43:45
,PAGES=102
,TYPE=STD
,NAME=S0003776
,Book Name=M-1101-AARSH RAMYANE
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,